PARŚVA FOUNDATION SERIES NO. 5

हर्षवर्धन-गणि-कृतं

# सदयवत्स-कथानकम्

संपादक

डॉ. ( श्रीमती ) प्रीतम सिंघवी

प्रकाशक

पार्श्व इन्टरनेशनल शैक्षणिक और

शोधनिष्ठ प्रतिष्ठान

अहमदाबाद

हर्षवर्धन-गणि-कृतं

# सदयवत्स-कथानकम्

•

संपादक

डॉ. ( श्रीमती ) प्रीतम सिंघवी

PĀRŚVA FOUNDATION SERIES NO. 5

GENERAL EDITORS :
H. C. BHAYANI
N. J. SHAH
N. M. KANSARA

हर्षवर्धन-गणि-कृतं

# सदयवत्स-कथानकम्

संपादक
डॉ. ( श्रीमती ) प्रीतम सिंघवी

प्रकाशक
पार्श्व इन्टरनेशनल शैक्षणिक और शोधनिष्ठ प्रतिष्ठान
अहमदाबाद
१९९९

**Harshvadhran-gaṇi-kṛta Sadayvatsa-kathānakam**
Edited by Dr. Pritam Singhvi

© P. Singhvi

First Edition 1999

Price : Rs. 60-00

Publisher : Dr. S. S. Singhvi
Managing Trustee
**Pārśva Internation Educational and Research Foundation,**
4-A, Ramya Apartment, Opp. Ketav Petrol Pump,
Polytechnic, Ambawadi, Ahmedabad-380015
Phone : 6562998, 6749220

प्राप्तिस्थान : सरस्वती पुस्तक भंडार
११२, हाथीखाना, रतनपोल, अहमदाबाद-३८० ००१
फोन : 5356692

Printed by : Krishna Graphics
Kirit H. Patel
966, Naranpura Old Village,
Ahmedabad-380 013 * (Phone : 7484393)

# General Editor's Forword

One Part of the academic undertakings by the Pārśva Educational and Research Foundation is to Publish Jain texts that are unpublished so far and research studies in Jainism, Prakrit and allied Indological areas. Accordingly we are Publishing herewith Harṣavadhan-gaṇi-kṛta Sadayvatsa-kathānakam edited by Pritam Singhvi.

We thank the Author to make the work available for being published in this Series.

## सदयवत्स-कथानक

# भूमिका

प्रस्तुत संपादन हर्षवर्धनगणि कृत 'सदयवत्स चरित्र' सर्व प्रथम इ.सन्. १८९३ में हीरालाल हंसराज की ओर से जामनगर (सौराष्ट्र, गुजरात) से प्रकाशित किया गया था। हीरालालजी ने कौनसी हस्तप्रति के आधार पर इसका पाठ दिया है उसके बारे में कुछ बताया नहीं है। और आपने संपादन के अंत में उन्होंने स्पष्ट रूप से कहा है कि मूल कृति के पाठ में उन्होंने अपनी इच्छा से फेरबदल किया है। ("आ ग्रंथनी मूलभाषा अस्तव्यस्त होवाथी तेमां बनतो सुधारो करी ते श्री जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे पोताना श्री जैन भास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे।" पृष्ठ १०८) इससे स्पष्ट होता है कि खास करके जैन पाठकों के लिये दान की महिमा करने वाली एक कथा प्रस्तुत करने के लक्ष्य से यह कृति प्रकाशित की गई थी। इसके पाठ की प्रामाणिकता नहीं मानी जा सकती।

बाद में यह हीरालाल हंसराज का "सदयवत्सचरित्र" के पाठ का आधार लेकर पं. मतिसागर ने १९३२ में 'सदैयवत्सकुमारचरित्रम्' नामक एक कृति प्रकाशित की है। यह भी हर्षवर्धनगणि का हीरालाल हंसराज प्रकाशित 'सदयवत्सचरित्र' को आधार लेकर नये ढंग से कथा लिखी गई है। इससे स्पष्ट होता है कि हर्षवर्धन गणि की रचना का मूल पाठ अब तक प्रमाणभूत रूप में प्रकाशित नही हुआ है। यहाँ हमने जो उस कृति का पाठ संपादित करके दिया है वह उसका मूल पाठ है। यह जेसलमेर के आचार्य गच्छ के हस्तप्रतभंडार की एक प्रतकी प्रतिलिपि है। प्रतिलिपि सद्गत जिनविजयजी मुनि की निगरानी में विजयचन्द्र ने तैयार की थी। हस्तप्रत का समय वि.सं. १५२८ है। उसमें ८वां पत्र नहीं है।

अमृतभाई भोजक ने हमें यह कापी सुलभ कराई। यह प्रति प्राचीन होने से हमने संपादित की है।

वार्डर के Indian Kavya Literature Vol. 6, (1992) P. 123.

में सदयवत्स-कथा के बारे में कहा गया है -

'In Jaina tradition [3279] we have a different version of śūdraka's (or Sadayavatsa's) life, as a son of a king of Mālva (in Ujjayinī, Should Prabhuvatsa be Vikramāditya ? ) who marries Sātavāhana's daughter. Though banished (wrongly) and a gambler he is befriended by a goddess because of his self-sacrificing heroism and also by bandits in possession of the science, thus he succeeds in all his adventures, eventually becomes emperor and also wins the fortune of king Nanda. At last he meets the sage Kālika, keeps the 'accomplishment' and will attain release in a future life.'

'सदयवत्स चरित्र' के संपादन में श्रद्धेय भायाणी सा. से मुझे काफी मार्गदर्शन मिला तथा पूर्व परंपरा के संदर्भ में मैंने उनका लेख भी दिया है उसके लिये मैं हृदय से आभार मानती हूँ।

इस पुस्तक को प्रकाशित करने के लिये पार्श्व शैक्षणिक और शोधनिष्ठ प्रतिष्ठान (अहमदाबाद) प्रति मैं हार्दिक आभार प्रकट करती हूँ।

क्रिश्ना ग्राफिक्स, अहमदाबाद को सुन्दर छपाई के लिये धन्यवाद देती हूँ।

प्रीतम सिंघवी

हर्षवर्धन-गणि-कृतं

# सदयवत्स-कथानकम् ।

धर्माज्जन्म-कुले शरीर-पटुता सौभाग्यमायुर्बलं
धर्मेणैव भवन्ति निर्मल-यशोविद्यार्थसम्पत्तयः ।
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते ।
धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्ग-प्रदः ॥ १

स च धर्मश्चतुर्धा -

दानं सुपात्रे विशदं च शीलं तपो विचित्रं शुभ-भावना च ।
भवार्णवोत्तारण-सत्तरण्डं धर्मं चतुर्धा मुनयो वदन्ति ॥ २

नो शीलं परिपालयन्ति गृहिणस्तप्तुं तपो न क्षमाः
आर्त्त-ध्यान-वशादग(?द्धुः)तोज्ज्वलधियस्तेषां क्व सद्-भावना ।
इत्येवं निपुणेन हन्त मनसा सम्यग्मया निश्चितं
नोत्तारो भव-कूपतोऽस्ति गृहिणां दानं विना कर्हिचित् ॥ ३

अतः सर्वथाऽपि मुख्यं दानम् । तच्चपञ्चधा-

अभयं सुपत्त-दाणं, अणुकंपा उचिय-कित्ति-दाणं च ।
दोहिंवि मुक्खो भणिओ, तिन्नि अ भोगाइयं दिंति ॥ ४

आद्य-दान-द्वयस्य मोक्ष-हेतुत्वात्मुख्य-धर्मांगत्वेना त्राभय-दाने पात्र-दाने च सदयवत्स-कथा ॥

[१]

अष्टादश लक्ष-द्विनवति-सहस्र-प्रमाण-ग्रामाभिरामो मालवक-देशोऽस्ति । अति-प्रचंड-वैरि-वृन्दैरप्यग्राह्याति-विषम-मण्डप-महादुर्ग-मण्डित-मध्य-प्रदेशो, विषम-दुर्भिक्ष-संत्रस्त-जनता संरक्षण-पितृगृहोपमः । तत्र सर्व-नगर-प्रधानोज्जयिनी नाम पुरी ।

प्राकार-परिखा-कूप-कासारारामा-राजिता ।
बाल-कोलाहलाकीर्णा-सौध-देवकुलाकुला ॥ ५

अगण्य-पुण्य-सम्पूर्णैः सज्जनैर्भूषितान्तरा ।
केन वर्णयितुं शक्या सा पुरी विस्मयावहा ॥ ६

कूटमेकमपि त्याज्यं स त्रिकूट त्वसाविति ।
स-कलंका ध्रुवं लंका मेने यन्मानवैर्न कैः ॥ ७

यत्र च -

विस्फुरत्-कन्दला वल्ल्यः सरोगा हंस-सारसाः ।
विरुद्धाः शाखिनः सर्वे न च लोकाः कदाचन ॥८

तस्यां पुरि प्रभुवत्सो नाम राजा राज्यं करोति ।

नमन्-नृपति-संघातैः सेव्यमान-पदाम्बुजः ।
प्रजा-वात्सल्यवान् दानी परोपकृतिकारकः ॥९

यस्य परोपकारित्वं सम्पूर्णं वर्ण्यते कथम् ।
वैरिणोऽपि समे येन, प्रापिताः स्वर्ग-सम्पदम् ॥ १०

तस्य राज्ञी महालक्ष्मीर्नामाऽऽत्म-रूपोपहसित-समस्त-सुरसुन्दरी-सौन्दर्या । तस्याः पुत्रः सदयवत्सो रूप-सौभाग्य-लावण्यादि-बहुगुण-युतो द्विसप्तति-कला-कुशलो विनयौदार्यादिगुणैः सर्वं परं रञ्जयामास । परं द्यूत-क्रीडा-रसिको बाल्यादपि । अति-द्यूत-व्यसनं दोष- निधानमिति पित्रानेकोपदेशैः शिक्षितोऽपि स न मुञ्चति

यतः

शशिनि खलु कलंकः कण्टकाः पद्म-नाले
जलधि-जलमपेयं पण्डिते निर्धनत्वम् ।
दयित-जन-वियोगो दुर्भगत्वं सुरूपे
धनपति-कृपणत्वं रत्नदोषी कृतान्तः ॥ ११

क्रमेण स यौवनं प्रापः ।

इतश्च तस्मिन्नवसरे नव-लक्ष-ग्रामाभिरामे महाराष्ट्र-देशे गोदावरी-तटिनी-तटे दक्षिणापथ-मण्डनं समस्ति प्रतिष्ठानं नाम पुरं नगरम् । यत्र स्वर्णमय-दण्ड-कलशाभिरामाः पञ्च-शतानि दशाधिकानि जिन-प्रासादा अभ्रङ्कषा विराजन्ते । अन्य-देवतायतनानि सहस्राधिकानि । यत्र कोटीश्वराणां विंशति-सहस्राणि ॥

सुमेरोराहृतानीव शृङ्गाणि कनकोत्कराः ।
गृहस्योपरि दृश्यन्ते, यत्र दारिद्र्य-तस्कराः ॥१२

यत्र द्विपञ्चाशद्-वीराणां शूद्र-कोकिलादीनां स्थानम् । चतुःषष्टि-योगिनीनां निवासास्पदम् ।

पुरेऽत्र प्रति-सामन्त-प्रणत्युन्नत-विक्रमः ।
सालवाहन-भूपोऽस्ति, जैनो निर्जित-शात्रवः ॥ १३

तस्य सर्वान्तःपुर-पुरन्ध्रि-प्रधानभूता कमलावती नाम राज्ञी । तस्याः प्राण-प्रिया सावलिङ्गी नाम्नी पुत्री बहु-पुत्रोपरि जाता, स्वरूप-निर्जित-रम्भाऽअखिल-जन-नयन-कुरङ्ग-वागुरा पितृ- भ्रातृ-चिताह्लादकारिणी ।

यस्याः पदाङ्गुष्ठ-नखौ मुखं च बिभर्ति पूर्णेन्दु-चतुष्टयं या ।
कलाश्चतुःषष्टिरूपैतु वासं, तस्यां कथं सुभ्रुवि नाम नाऽस्याम् ॥ १४

तस्याः पाणि-ग्रहण-निमित्तं स्वयंवर-मण्डपो राज्ञा कारितः । तत्र बहु-राजकुमारा आकारिताः सन्तो मिलिताः । तच्छ्रुत्वा प्रभुवत्स-राज्ञे मन्त्रि-प्रभृतिभिः रुक्तम् । देवान्ये राजकुमाराः स्वयंवर-मण्डपे गताः । युष्मत् कुमारस्याकारणायाद्यापि कोऽपि जनो नागतोऽस्ति ततः कुमारं स्वयमेव प्रेषयत । राजाह-उत्तमाः प्रौढे-तावन्मेलापकेऽनाकारिताः कथं गच्छन्ति ।

यतः

अनादतः प्रविशतिह्यपृष्टो बहु भाषते ।
अदत्तमासनं भेजे स पार्थ पुरुषाधमः ॥ १५

मा उत्सुका भवन्तु । स्थिरा लक्ष्मीः । (अत्र कथा ।)

अत्राऽऽगमिष्यति जनः इति वदत एव राज्ञोऽग्रे दूत आगात् । तेनोक्तम्-देव सदयवत्सकुमारा कारणायाहं प्रेषितोऽस्मि राज्ञा श्रीसालवाहनेन । ततो राज्ञा कुमारो मन्त्रिभिः सह प्रेषितो बहु-सैन्य-युतः । राज्ञा मन्त्रिणे उक्तं यदयं कुमारो व्ययार्थं मार्गयति तत् सर्वं समर्पणीयमस्य । कृपणत्वं न करणीयं । दान-शौण्डे मेलापके मिलिते कार्पण्यं महदपकीर्तये स्यात् ।

यतः

औदार्य-गुण-युक्तेषु कृपणो नैव शोभते ।
भद्र-जाति-गजेन्द्रेषु यथा गर्दभ-मंडलम् ॥ १६

राज्ञेत्थं शिक्षितोऽपि मन्त्री कृपणः कुमाराय स्तोक-स्तोकमेवादाद् दानादि-व्ययार्थम् ।

यतः ।

ऋणादपि महान् कम्पो दानस्याऽवसरे भवेत् ।
भीमः सङ्कुचितो गात्रे दान-दातव्य-शङ्कया ॥ १७

गोग्रहे कौरव-हृत-गो-'[धना]हारार्थं गच्छन् हर्षादुल्लसद्गात्रो भीमः सन्नाहं गृह्णाति, परं देहे नाऽऽगच्छति । अपरे पाण्डवा व्याकुलीभूताः कृष्णं विज्ञापयन्ति—भीमदेहे सन्नाहो नागच्छति किं करिष्यति । कृष्णः प्राह-धीरा भवत । ततः कृष्णो ब्राह्मण-वेषेण दान-मार्गणाय तमयाचत् । भीमस्तदा दातव्य-वस्त्वभावात् खेदात् संकुचित-गात्रोऽभूत् । सन्नाहो देह आगाद् ।

विष्णुः स्वं प्रकटीचक्रे।

यद्वा राजकुले व्ययो याति भाण्डागारिकस्तु दुर्बलो भवतीति न्यायः। तेन स कुमारो मनसि दूनोऽपि तत्र न किमप्यचीकथत्।

यतः

अर्थ-सम्प्राप्ति-काले यः स्वजनैः कलहायते।
तदर्थाद् भ्रश्यते नूनं प्रतिष्ठा तस्य हीयते॥ १८

कुटुम्ब-समवायेन यत् कार्यं क्रियते शुभम्।
कालेन भवति प्रायस्तत् परिणाम-सुन्दरम्॥ १९

कुटुम्ब-कलहे न स्यात् कदा कार्यं महागुणम्।
अचिरेणैव कालेन भवेत् तद् दुःख-दायकम्॥ २०

विग्रहः खलु कुलेन नोचितो मोदतेऽरिकुल-कल्प-पादपः।
कन्दरन् स्व-भरेण सिंहयोः(?) प्रीतिमेति न वने वनेचरः॥ २१

तत्र गतः सौभाग्य-भाग्यादिभिर्गुणैः सर्व-राज-समुदायं स्तम्भित्वा तस्याः सावलिंग्याः सदयवत्स-पाणिग्रहणमकरोत्।

यतः

यस्या योऽस्ति वरो भावी पूर्व-कर्म-प्रभावतः।
स एव भवति प्रायो नात्र कार्या विचारणा॥ २२

तथा-

जो जस्स कए घडिओ संघडइ सु-दूरओवि सो तस्स।
वच्चंति विंझ-गिरि-संभवा वि सयंवरे करिणो॥ २३

सालवाहन-राज्ञा हस्त-मोचने बहु-गज-तुरङ्गादि दत्तम्। तदनन्तरं सो बहु-कोटि-धन-व्ययात् तत्र स्व-नाम संस्थाप्य क्रमेण स्व-पुरमाजगाम। राज्ञा प्रवेश-महोत्सवश्चक्रे। अनुरूप-भार्यान्वितः पितृ-बहुमान-हृष्टः सुखेन राज्य-लीलामनु भवति। अन्यदाऽति-द्यूतासक्तत्वेनास्थाने बहु-द्रव्य-व्यय-करणाद् दूनेन राज्ञा कुमारस्य शिक्षा प्रादायि -

वत्स नो वेत्सि किं राज्यं बहु-कार्य-निरन्तरम्।
स्वार्थैक-करण-व्यग्र-परिवार-समावृतम्॥ २४

सावधानतया चिन्त्यं करण्डस्थ-भुजंगवत् ॥
नियन्त्रणीयं कपिवद् गुणैः शाखान्तरं व्रजन् ॥ २५

फलित-क्षेत्रवन् नित्यं रक्षणीयं प्रयत्नतः ।
नव्याराम इव स्थित्या सेचनीयं मुहुर्मुहुः ॥ २६

अनीति-जल-कल्लोलैः शैलमुच्चैः क्षणाद् ध्रुवम् ।
व्यसनाख्यो नदी-पूरः पातयेद् राज्य-पादपम् ॥ २७

एतदेव हि पाण्डित्यं यदायादल्पको व्ययः ।
अत्रोदाहरणंदृष्टं स्पष्टं मुनि-कमण्डलुः ॥ २८

नित्यं कृत-व्ययः स्वैरं मेरुरप्यपचीयते ।
तेजस्वीव गते वित्ते नरोऽङ्गार-समो भवेत् ॥ २९

बन्धुर्बन्धुर-धीस्तावत् तावद् भार्या मनोनुगा ।
सर्वः कलकलस्तावद् यावद् द्रव्य-समागमः ॥ ३०

निर्द्रव्यं च नरं नूनं संत्यजन्त्यनुजीविनः ।
मुञ्चन्ति विहगाः सद्यस्तडागमिव निर्जलम् ॥ ३१

अद्य-श्वो वा तवैवायं राज्य-भारोऽवतिष्ठते ।
तन्निर्वाहक्षमं विद्वन् सधारण-गुणान् श्रय ॥ ३२

दाने द्यूतेऽत्याऽसक्तिर्दोष एव । सर्वं युक्त्यैव क्रियमाणं गुणायान्यथाऽनर्थाय ।

यथा-

तरु-दाहोऽतिशीतेन, दुर्भिक्षमति-वर्षणात् ।
अतिद्यूताच्च निर्वित्तः अति कुत्राऽपि नेष्यते ॥ ३३

यतः

एको रविरति-तेजा अति-शूरः केसरी वने वासी ।
अति-विपुलं खं शून्यमति-गम्भीरोऽम्बुधिः क्षारः ॥ ३४
अति दानाद् बलिर्बद्धो ह्यति-दर्पेण रावणः ।
अति-रूपाद्धृता सीता ह्यति सर्वत्र वर्जयेत् ॥३५

तथा

जिहिं न मुणिज्जइ देवगुरु, जिहिं नवि कज्ज अकज्ज ।
तणु-संतावण कुगइ-पह, कुण तिणि जूअ रमिज्ज ॥ ३६

रक्षणीयः सदा दक्षैः पुरेऽपि व्यसनी वसन् ।
पापानां व्यसनं मूलं पापं दुःख-ततिरिव ॥ ३७

धर्मस्याव्यसनं मूलं धर्मः सर्व-सुख-श्रियाम् ।
व्यसनैः सुखमिच्छन्ति मूढाः शैत्यमिवानलात् ॥ ३८

सर्व-व्यसन-मुक्तेषु युक्तेषु सुकृतोत्सवैः ।
पुरुषेषु त्वया तात रचनीया रतिस्ततः ॥ ३९

सत्सङ्गात् पूज्यता भवेद् ।

यतः

शिरसा सुमनःसङ्गाद् धार्यन्ते तन्तवोऽपि हि ।
तेऽपि पादेन मृद्यन्ते पटेषु मल-संगतः ॥ ४०

इत्यादि-शिक्षां प्रतिपद्य प्राह कुमारः-तात राज्ञां लक्ष्मीरअनन्ता । किं गण्यते । राजाचे-एवं-राज्ये चेद् बहु हेम स्यात् तदा महिष्याः शृङ्खला विधीयते । तैलं बहु चेत् तदा गिरयः स्निह्यन्ते । अमृतं बहु तदा पाद-शौचं विधीयते । एवं युक्त्या वारितोऽपि न तिष्ठति ।

प्रतिवक्ति च -

सुवर्णैः पटकूलैश्च शोभन्ते वारयोषितः ।
पराक्रमेण दानेन राजन्ते राज-नन्दनाः ॥४१

अनुकूले विधौ देयं यतः पूरयिता हि सः ।
प्रतिकूले विशेषेण यतः सर्वं स नेष्यति ॥ ४२

दातव्यं भोक्तव्यं सति विभवे संचयो न कर्तव्यः ।
पश्येह मधुकरीणां संचितमर्थं हरन्त्यन्ये ॥ ४३

राजा पुनः प्राह-

द्यूत-पोषी निज-द्वेषी, धातु-वादी तथाऽलसः ।
आय-व्यय-मनालोची यस्तद्गेहे वसाम्यहम् ॥ ४४

इति दारिद्य वचनम् ॥

गुरवो यत्र पूज्यन्ते धान्यं यत्र सुसंचितम् ।
अ-दन्त-कलहो यत्र तत्र शक्र वसाम्यहम् ॥ ४५

इदं लक्ष्मी-वचः । इत्यादि-वाक्-प्रपंचैर्निरुत्तरीकृतेन राज्ञा रुष्टेन स स्वसौधाद् बहिष्कृतः ।

यतः-

द्यूतं यो यम दूताभं हालां हालाहलोपमाम् ।
पश्येद् दारान् यथाऽङ्गारान् स भवेद् राज-वल्लभः ॥ ४६

प्रोक्तः प्रत्युत्तरं नाह विरुद्धं प्रभुणा च यः ।
न समीपे हसत्युच्चैः स भवेद् राज-वल्लभः ॥४७

ततोऽस्य माता तं शिक्षयति—वत्स पितुः सम्मुखमुत्तरं न दीयते ।

यतः

पढमं चिय गुरु-वयणं मम्मुर जलणु व्व दहइ भण्णंतं ।
परिमाणे पुण तच्चिय मुणाल-दल-सीयलं होइ ॥ ४८

किं बहुणा विणओ च्चिय अ-मूल-मंतं जए वसीकरणं ।
इह-लोय पार-लोइय-सुहाण मण-वंछिय-फलाणं ॥ ४९

तथा च -

अर्थ-पतौ भूमि-पतौ बाले वृद्धे तपोऽधिके विदुषि ।
योषिति मूर्खे गुरुषु विदुषा नैवोत्तरं देयम् ॥५०

मातृ-पित्रातुराचार्यातिथि-भ्रातृ-तपोधनैः ।
वृद्ध-बालाबला वैद्यापत्य दायाद-किंकरैः ॥ ५१

स्वसृ-संश्रित-सम्बन्धि-वयस्यैः सार्धमन्वहम् ।
वाग्-वग्रहमकुर्वाणो विजयेत जगत्-त्रयीम् ॥ ५२ ॥

ततो मुख्य-सौधाद् बहिः स्थितः सभार्यः तदा तन्माताऽपि सुत-निष्कासन-दूना तत्पार्श्व एवास्थात्। वधू-पुत्र-सहितायास्तस्य राजा व्ययं पूरयति। कुमारो नगर-मध्य द्यूतादि-स्थानेषु रमते। व्यसनं कस्य सुत्यजम्। हारितं धनमिभ्येभ्यो मार्गयित्वा ददाति। तेऽपि च बहु-प्रत्यर्पण-वाक्येन राजकुमारत्वेन पश्चादप्यस्यैव राज्य-सम्भावन-सेव्यतया च ददन्ति। दत्तं धनं चटति तदा चटतु नो चेत् तदा यात्विति दीर्घसूत्रिणः प्रयच्छन्ति तस्मै ।

यतः

स्वामी सम्भावितैश्वर्यः सेव्य-गुणान्वितः स च ।
सुक्षेत्र-बीजवत् कालान्तरेऽपि स्यान्न निष्फलः ॥ ५३

एवं समाधिमतोऽस्य दिनानि व्रजन्ति। इतश्च तत्र पुरे कोऽपि विप्रो महादेव-नामा ज्योतिर्विद्याविदां मुख्यः कर्मवशाद् दारिद्येण पीडितोऽस्ति ।

दग्धं खाण्डवमर्जुनेन विपिनं दिव्यैर्द्रुमैर्वासितं
दग्धा रावण पालिता हनुमता दिव्या च लङ्कापुरी ।
दग्धः पञ्चशरः पिनाकपतिना लोकत्रयी-वल्लभो
दारिद्र्यं जन-दुःख-दायि यदि नो दग्धं तदा किं कृतम् ॥ ५४

जाई विज्जा रूवं तिन्नि-वि निवडंतु कंदरा-विवरे ।
इक्को-वि हवउ अत्थो जेण गुणा पायडा हुंति ॥ ५५

इत्यादि-प्रकारै दैवोपालम्भान् सृजति । एकदा तद्भार्यया प्रोक्तम्—स्वामिन् तव विद्याः कस्मिन्नर्थे समेष्यन्ति । विद्याभिः सर्वत्र पुष्कलानि धनानि प्राप्यन्ते ।

यतः

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ५६

अतोऽहं ब्रवीमि विद्याहीनः पुरुषः पशुरेव ।

यतः-

आहार-निद्रा-भय-मैथुनानि सामान्यमेतत् पशुभिर्नराणाम् ।
ज्ञानं विशेषः खलु मानुषाणां ज्ञानेन हीनाः पशवो मनुष्याः ॥५७

अतोऽहं ब्रवीमि—त्वमियद्विद्यापारङ्गतोऽपि किमेवं दारिद्य-पीडां विषहसे ।

विज्जा-धणू जेहि घरि, ताह अहीणुं काई ।
नितु दूडइ नितु दूडिसि, इवि सूकिसि मुआइ ॥५८

विप्रेणोक्तम्—प्रिये, त्वं सत्यं ब्रूषे, परंहं किं करोमि क्व गच्छामि । बह्वानयनेऽपि गृहं दुष्पूरम् । सा वक्ति -नाथ गृहं कदापि किं पूर्णं भवति ।

यतः-

अग्निर्विप्रो यमो राजा समुद्र उदरं गृहम् ।
सप्तैतानि न पूर्यन्ते पूर्यमाणानि नित्यशः ॥ ५९

ततो भार्याऽब्रवीत्-अस्मिन् पुरे दाने कर्ण-समो नृपतिर्विद्यावद्दारिद्र्यं चूर्णीकरोति । तत्र गत्वा तं द्रव्यं मार्गय । यतो ब्राह्मणानां याचनं न लज्जाकारि । कोटीश्वरोऽपि याचमानो न लज्जते विप्रजनः ।

यतः

विप्रेष्वाजीविका सृष्टा दानि-दानेन वेधसा ।
तेन तद्ग्रहणे नैव लज्जते ब्राह्मणो नृप ॥ ६०

तथा च

स्वप्नेऽपि याचमानो विप्र-जनो भ्रमति भूतले सततम् ।
यो यत्करणे रसिकः प्रायः स्वप्नेऽपि तत् कुरुते ॥ ६१

विप्रः प्राह — तत्र गमनेन किं ।

यतः -

विकटाटव्यामटनं शैलारोहणमपांनिधेस्तरणम् ।
क्रियते गुहाप्रवेशो विहितादधिकं कुतस्तदपि ॥ ६२

पुनः सा प्राह -

उद्योगिनं पुरुष सिंहभुपैति लक्ष्मीद् दैवं हि दैवमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ६३

इत्यादिवाक्यैस्तत्प्रेरितः स राज-सभां गतो नव-ग्रहाणामाशीर्वादमदात् ।

यथा-

मार्तण्डस्तारानाथः क्षोणीसूनुस्तनुश्चेन्दोर्वागीशो दैत्याचार्यच्छायापुत्रो राहुः केतुर्नक्षत्रैरश्वि-न्याद्यैस्तारा सङ्घैः स्वामि-युक्तैः कल्याणं वो नित्यारोग्यं लक्ष्मीमायुः कुर्वन्तु ।

ततो राज्ञा पृष्टः - कुतो देशात् समागता यूयम् । स आह - अत्रैव पुरे वसन्नस्मि । पुनर्नृपतिराह—इयन्ति दिनानि । नाजग्मुर्भवन्तः ।

विप्रोऽवदत्-न-स प्रकारः कोऽप्यस्ति येनेयं भवितव्यता ।
छायेव निज-देहस्य, लङ्घ्यन्ते जातु नो नरैः ॥ ६४
कर्मणामर्गला लग्ना पापमद्य क्षयं गतम् ॥
भाग्येन दर्शनं जातं तवाद्यैव महीपते ॥ ६५

पुनः प्रोवाच राजा - द्विजराज मम किं दूषणम् ।

विप्रः प्राह- देव तव किं दूषणम् ।

यतः -

नोलूकोऽथ विलोकते यदि दिवा सूर्यस्य किं दूषणम्
पत्रं नैव यदा करीर-विटपे दोषो वसन्तस्य किम् ।

वर्षा नैव पतन्ति चातक-मुखे मेघस्य किं दूषणम्
यत् पूर्वं विधिना ललाट-लिखितं तन्मार्जितुं कः क्षमः ॥६६

राजाऽवदत् - कामपि शास्त्र-वार्तां वेत्सि । सोऽवोचत्-देव किमपि पृच्छ यथा स्वयमेव ज्ञास्यसि ।

यतः -

पातु वो निकष-ग्रावा मति-हेम्नः सरस्वती ।
प्राज्ञेतर-परिच्छेदं वचसैव करोति या ॥ ६७

यद्वाऽनेकप्रकारा विद्याः

उपकाराय या पुंसां न परस्य न चाऽत्मनः ।
पत्र-संचय-संभारैः किं तया भार-विद्यया ॥ ६८

अनुष्ठानेन रहिता पाठ-मात्रेण केवलम् ।
रञ्जयत्येव या लोकं किं तया शुक-विद्यया ॥ ६९

गोप्यते या श्रृतज्ञस्य मूर्खस्याग्रे प्रकाश्यते ।
न दीयते सुशिष्येभ्यः किं तया शुष्क-विद्यया ॥ ७०

परोत्कर्षं समाच्छाद्य विक्रयाय प्रसार्यते ।
या मुहुर्धनिनामग्रे किं तया पण्य-विद्यया ॥ ७१

न तीर्यतेययाऽघोरः संसार-मकराकरः ।
नित्यं चिन्तासु बन्धिन्या किं तया मोह-विद्यया ॥ ७२

न विवेकाञ्चितां बुद्धिं न वैराग्यमयं मनः ।
संपादयति या पुंसः किं तया कष्ट-विद्यया ॥ ७३

पर-मात्सर्य-शल्येन व्यथा संजायते यथा ।
सुख-निद्रापहारिण्या किं तया शूल-विद्यया ॥७४

पर-सूक्तापहारेण स्व-सुभाषित-वादिना ।
स्वोत्कर्षः स्थाप्यते यस्याः किं तया चोर-विद्यया ॥ ७५

लोभः प्रभूत-वित्तस्य रागः प्रव्रजितस्य च ।
न यया शान्तिमायाति किं तया शोक-विद्यया ॥ ७६

गृहे चैव प्रगल्भेत सभायां न प्रवर्तते ।
प्रतिभासयतो याति किं तया दोष-विद्यया ॥७७

यया भूपतिमादृत्य परेषां गुण-निन्दकः ।
दान-मानोन्नतिं हन्ति किं तया द्वेष-विद्यया ॥ ७८
रसायनी जरा-जीर्णश्चिर-रोगी यया भिषक् ।
धातु-वादी दरिद्रश्च किं तया हास्य-विद्यया ॥ ७९
परोपतापः क्रियते-वश्यादि-करणैर्यया ।
यंत्र-तंत्रानुसारिण्या किं तया काक विद्यया ॥ ८०
कंठस्था या भवेद् विद्या सा प्रशस्या सदा बुधैः ।
या गुरौ पुस्तके विद्या तया मूढः प्रतार्यते ॥ ८१

अहं तु स्व-कंण्ठस्थया विद्ययात्रैवावस्थितस्त्रजगद-वार्तां वेद्मि । परं ज्योतिःशास्त्रे विशेषेणाधीत्यस्मि । ज्योतिःशास्त्रोक्त ग्रह-चार-वक्रीति-वारोत्पातावस्था, आगामि-संवत्सर - भाव-नष्ट जन्म-वर्तन-चन्द्र-सूर्योपराग-तन्मानभूत-भावि-काल-स्वरूप-ज्ञान नष्ट-वस्तु-प्रकटनादि मम किमप्य-नावेद्यं नास्ति । मम सर्वज्ञ इति प्रसिद्धिं जनो वक्ति । एतदतिरेक-वचनमाकर्ण्य राजा मनसि चुकोप-अहो कियान् गर्व-पर्वतोऽसौ ।

असारस्य पदार्थस्य प्रायेणाडंबरो महान् ।
नहि स्वर्णे ध्वनिस्तादृग् यादृक्कांस्ये प्रजायते ॥ ८२

यद् वा
उत्क्षिप्य टिट्टिभः पादमास्ते भंग-भयाद् भुवः ।
स्व-चित्त-कल्पितो गर्वः कस्य न विद्यते भुवि ॥ ८३

ततो राजाह-हे विप्र, अन्यत्र-भवा वार्तास्-तिष्ठंतु । किं ताभिरज्ञात-स्वरूपाभिः । कामपि मम पुर आसन्नां वार्तां भविष्यन्ती कथय । तावता राज्यस्यालं करणं जयमंगलाभिधः पट्ट-गजेन्द्रस्तत्र राज्ञः प्रणामार्थमग्रे समागात् । शास्त्रे गजानामायुर्वर्ष-शतं श्रूयते । नृपतिना तदायुरेव पृष्टम् । तेन लग्नमवलोक्य प्रोचे-देव, वक्तव्य-सदृशं नास्ति । राजाह-कुतः । स वक्ति-राज्ञोऽप्रीतिकरणात् । राज्ञोऽप्रीतिकरणे महानुपद्रव आत्मनोत्पादितः स्यात् ।

जो पव्वया सिरसा भित्तु मिच्छे सुत्तं च सीहं पडिबोहये जो ।
जो वाहये सत्तिय गो-पहारं ? एसोवमायायणया(?) गुरुणं ॥८४

एवं को वयणे ते वाणं (१) इत्यादि । राज्ञोचे-कथय यथा-दृष्टम् । विप्रेणाक्तम्-शृणु आगामि-दिनेऽस्य गजस्य प्रहर-द्वय-समये मरणं भविष्यति । ततोऽनाहत-वचनेनाभीष्ट-गज-वियोगवचनेन च राजा रुष्टः । सभाजनैश्च निंदितो विप्रः कारागृहे क्षिप्रस्तं तद्-रक्षका जना

मुक्ताः। जना हसंति सर्वे-अहो दैवज्ञेन गज-मरणं ज्ञातं, परमात्मनः कारागृह—पतनं न ज्ञातम्।

यतः

गगने गणयति गणकश्चन्द्रेण समागमं विशाखायाः।
अन्यासक्तां गृहिणीं कथमपि मूढो न जानाति ॥ ८५

राजा वक्ति-यदि कूटं भविष्यति तदाऽस्य हृदये ललाटे च डम्भान् दापयिष्ये विप्रस्यावध्यत्वात्। राज्ञा गजेन्द्र-रक्षार्थं यत्नः कारितो। गज-वैद्याश्चाकार्य दर्शितः। तैरुक्तं-देव अस्य गजस्य वपुर्निरामयं समस्ति। नहि कोऽप्युपघातः तेन नानाहारैः पोष्य एव। ततो लोह शृङ्खलाभिर्निगडित आलानस्तम्भे बद्धः। रात्रिर्व्यतीयाय सुखेन। प्रभाते तत्रागान्नृपः। पृष्ठा गज-स्वरुपं हस्तिपकाः। तैरुक्तं-देव, सुखी गजः प्रहरोऽतिचक्रमे। ततो द्वितीय -प्रहरे गजो मदेनोन्मत्तो बभूव। आलान-स्तम्भमुन्मुल्य शृङ्खलाः खण्डशः कृत्वाऽऽषाढ-मासोन्नत-सजल-जलदवद् गर्जन् हस्तिशालातो निस्ससार। पुरे निरङ्कुशो भ्रमति। हट्टाट्टालानि पातयति। चतुष्पथे सौगन्धिक-हट्टस्तत्र-कर्पूर-कस्तूरिकागुरु-सुगन्ध-तैल-प्रमुख-वस्तूनि तथो वलितानि यथा तेषां लवोऽपि न लभ्यते। घृत-हट्टेषु घृत-तैल-भाजनानि तथा ढोलितानि यथा घृत-तैलानां नद्यवहत्। दोसी-हट्टेषु जल-कर्पट-पट्टकूल-शाटिकादि-वस्त्राणि तथोल्लालितानि यथैकच्छ्रयमभूत्पुरम्। नैस्तिक-हट्ट-वस्तु पुग-सञ्चयैस्तदुत्क्षिप्तैश्चतुष्पथं दन्तुरमजनि। ताम्बूलिक-पत्रसंचया गजेन सर्वत्र प्रसारिताः। नश्यद्भिर्लौकैः कलकलमयं पुरमजनिष्ट।

इत्थं सर्व-प्रकारेण पुरं निस्सारं कुर्वन् ब्राह्मण-पाटके गजो जगाम। तावता कस्यापि विप्रस्य भार्या सीमन्त-भवनेन महोत्सव-पंच-शब्द वाद्य-निनाद-पूर्वं पति-गृहाच्छ्वशुर-गृहं गच्छत्यस्ति। इतः स गजस्तत्रैवागात्। तं गजं प्रत्यक्ष-यम-दूतमिव दृष्ट्वा परिजनो मरण-भय-त्रस्तो दिशोदिशं ननाश। सा बाला गर्भ-भाराच्छाटिका-मुकुटादि-बहु-नेपथ्यभाराच्च नष्टुमशक्ता गजेन गृहीत्वा दन्त मुशलोपर्यधारि। हाहाकारोऽभूत्। तावत् तत्पतिर्बुम्बारवं कुर्वन् मुखतो हंहं ब्रुवन् सदयवत्सकुमाराग्रे निर्गतः, तदुच्चैः क्रन्दन्स वक्ति-अहो सुभटा यो मम गृहिणीं रक्षति तस्य हार-कुण्डलाद्याभरणानि ददाम्यपरमपि पारितोषिकमर्पयामि। अहो ! सुभट-कुल-मण्डनं कोऽप्यस्ति। मात्रा पीडित-जन-रक्षा-करण-क्षमःकोऽपि जनितोऽस्ति। ततो द्यूत-स्थान-स्थेन कुमारेण पृष्टं-कि जातम्। स तत्स्वरूपमाह। सदयश्चिन्तयति :-

किं पौरुषं रक्षति येन नार्त्तान् किं तद्धनं नार्थिजनाय यत्स्यात्।
सा का क्रिया या न हितानुबन्धा किं जीवितं साधु-विरोधि यद् वा ॥८६

कुमारोऽधावत। रे मातंग ब्रह्म-स्त्री-हत्या-कारक मातंग मुञ्चैनाम्। गजो न मुञ्चति तां बहु प्रकारैः खेदितोऽपि। ततः क्रुद्धेन कुमारेण खड्ग-घाताद् गज-शिरश्छित्त्वा बलान्मोचिता।

नगरं स्वस्थं बभूव। राजाऽप्युरु पुरोपद्रव-निवर्तना द्धृष्टः सन् कुमारं सच्चक्रे। पुर-जनोऽपि कुमार-पौरुष-गुण-हृष्टः कुमार-सहितं राजानं मौक्तिक-हारादिभि-र्भेटनक प्रदानेन प्रपूजयति। ततो विशेषेण पुत्रस्य सन्मानं करोति नृपः। ततो ज्योतिर्वित् कारागृहान्निष्कारय प्रपूजितः। तज्ज्ञान चमत्कृतेन राज्ञा ग्रामादि-दान प्रदानेन संतोषितः

यतः-

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय दुःखम्।
कीर्तिं च दिक्षु वितनोति ददाति लक्ष्मीं,
किं किं न साधयति कल्पलतेव विद्या ॥ ८७ ॥

कन्या-जीवित-दान-हृष्टास्तन्मातृ-पक्ष-सम्बन्धिनो विप्र-जना एकावली-हारादिना तत्कुमारं वर्धापनं कृत्वा प्रपूजयन्ति। सा बाला तु स्व-हस्तेन शेषां भृत्वा तिलकं चकर्ष मौक्तिकाक्षतपात्रेण वर्धापयति च कुमारं। तदनन्तरं राजा तदैव कुमारे युवराज-पदं दत्त्वा सुखेन राज्यं करोति। इतश्च मन्त्रीश्वरश्चिन्तयति-यदि कुमारस्येयन्मानं राज्ञोबभूव तदा मम सूत्रं विनष्टं। यतो मयाऽयं पूर्वं पाणिग्रहणा-वसरे धन-मार्गणानर्पणतः कोपितोऽपमानितोऽस्ति। ततोऽधुना तद्वैर निर्यासनं करिष्यति।

यतः

घातः शुन इवाज्ञस्य-विस्मर्येत क्रमान्तरे।
सिंहस्येव न वीरस्य कदापि पर-सम्भवः ॥ ८८

तथा च -

प्रियं वा विप्रियं वापि सविशेषं परार्पितम्।
प्रत्यर्पयन्ति के नात्र दृष्टान्त उर्वरा खलु ॥८९

अतोऽयं प्रसरन्नोपेक्षणीयः।

यतः -

य उपेक्षेत शत्रुं स्वं प्रसरन्तं यथेच्छया।
रोगं वाऽऽलस्य-संयुक्तः स शनैस्तेन हन्यते ॥९०

तथा चाटु-वचस्तया ममापराध इयन्ति दिनान्यनेन स्वभिरक्षितो बहुवालनाय यतोऽसौ राजनीतिवेत्ता।

यथाः -

वहेदमित्रं स्कन्धेन यावत् काल-विपर्ययः
आगते तु निजे जाले भिन्द्याद् घट मिवाश्मनि ॥ ९१

तथा च

जिम जिम केसरी पाय उहट्टइ जिम जिम विसहर नउली वट्टइ ।
दीण-वयण जइ जंपइ सूरउ ते उ डबक्कउ देसिइ पूरउ ॥ ९२

तेनाधुना मम दिवसो रुष्ट इव दृश्यते ।

यतः

दीहा रुट्ठा तं करइ जं वइरी न करंति
दीह पलट्टइ रावणह पत्थर नीरि तरंति ॥ ९३

भवतु । परं संजातमपि राज-मानं टालयामि निज-बुद्ध्या ।

यतः-

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥ ९४

कथा प्रसिद्धा

एतावता स्वबुद्धि-वैभवात्-कुमार-निष्कासनोपायो दृष्टस्तेन ।

यतः-

अति-मलिने कर्तव्ये भवति खलानामतीव-निपुणा धीः ।
तिमिरेऽपि कौशिकानां रूपं प्रतिपद्यते दृष्टिः ॥ ९५

ततो माष-पूरितं लोह-स्थालं स्थापितोपरि-प्रौढेङ्गालकं कृष्ण-दुकूल-युगल-सहितं राज्ञ उपदीचकार मन्त्री । तदपूर्वं दृष्ट्वा राजाऽप्राक्षीत् मन्त्रिन् किमतत् । स आह-देव एते लोका उपदाः कुर्वीत । ततोऽहमपि तामकार्षम् । राज्ञोचे -ईद्दक् प्राभृतकं क्वाऽपि न दृष्टं । मन्त्री प्राह-हे राजन् तवाधुनेद्दगेव प्राभृतं विलोक्यते । राजाऽऽह-कस्मात् । मन्त्री वक्ति-

वैद्यो गुरुश्च मन्त्री च यस्य राज्ञः प्रियंवदः ।
शरीर-धर्म-कोशेभ्यः क्षिप्रं स परिहीयते ॥ ९६

सुलभाः पुरुषा राजन,सततं प्रिय-वादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ ९७

अप्रियाण्यपि पथ्यानि ये वदन्ति नृणामिह ।
त एव सुहृदः प्रोक्ता अन्ये तु नाम-धारकाः ॥ ९८

अतः कठोर वचनं ब्रवीमि । हे राजन् ! सकल-राज्य-सारो जयमङ्गलो गजः । सोऽपि कुमारेणैक-स्त्री-मात्र-कृते हतः , त्वं तु तस्यापि कुमारस्य मानं ददासि । कोपं-करण स्थाने यौवराज्य-पदं दत्से । वैरि-जयोऽनेनैव गजेन ।

यतः

स सुधीर्यस्य भूमिः स्याद् यस्याश्वास्तस्य मेदिनी ।
विजयी यस्य मातङ्गा यस्य दुर्गः स दुर्जयः ॥ ९९

ईदृग् गज-रत्नं चतुरङ्ग-चमू-मण्डनम्, अतः परं तेषां वैरिणां गृहेषूत्सवा भवन्तः सन्ति। देव स गजः कुत्रत्यो योऽवसरेऽवसरे मद-मत्तो न भवति । परमेवंविधं गज-रत्नं यत्र तत्र किं तिष्ठति । विपुल-भाग्यवतामेव गृहे तिष्ठति । एवमल्पे कार्येऽस्य हनने का युक्तिः । परं विनाशकाले विपरीतबुद्धिर्भवति ॥

यतः -

न निर्मिता कैर्न च दृष्ट-पूर्वा । न श्रूयते हेममयी कुरङ्गी ।
तथापि तृष्णा रघु-नन्दनस्य विनाश-काले विपरीत-बुद्धिः ॥१००

इत्यादिवचनं ब्रुवति सूचीतस्तथा कर्णे पीडितो यथाऽति-कर्ण दुर्बलत्वेन राजा तद्वचन-पद्धतिं सत्यामेव मन्यमानः क्रुद्धः कुमारस्य देश-निष्कासनमादिशति ।

यतः

दुर्ब्बल-कन्ना वंक-मुहा खंधग्गला स-रोस
जेता गुण तुरंगमह तेता माणस-दोस ॥ १०१
अ-कर्ण-दुर्बलः शूरः कृतज्ञः सात्विको गुणी ।
वदान्यो गुणरागी च प्रभुः पुण्येन चाऽऽप्यते ॥ १०२

अथवा

पाषाण-जाल-कठिनोऽपि गिरिर्विशालः
सम्भिद्यते प्रति-निशं वहता जलेन ।
कर्णोपजाप-वचनैः परिपीड्यमानः
को वा न याति विकृतिं दृढ-सौहृदोऽपि ॥ १०३

प्रातः कुमारं प्रति राजाऽऽह - अरे ! गज-रत्नमानय । नो चेत्-त्यज मे देशं । कुमारः प्रोचे ओम इत्युक्त्वा प्रणम्य च निर्गतः सभामध्यात्तदैव । तेजस्वी तर्जनं न सहते । चिन्तितवांश्च ।

देशान्तर दिदृक्षाऽपि पूर्यतां मम संम्प्रति ।
भूपतिरपि जानातु स्वसूनो....भिमतम् ॥ १०४

माणि पणट्ठइ जइ न तणु तो देसडा चइज्ज ।
मा दुज्जण-कर-पल्लविहिं देसिज्जंतु भमिज्ज ॥ १०५

परं विषादभाङ् ना भूत् ।

यतः

सम्पदि यस्य न हर्षो विपदि विषादो रणे च धीरत्वम् ।
तं भुवनत्रयतिलकं, जनयति जननी सुतं विरलम् ॥ १०६ ॥

तत्स्वरुपं मन्त्रिणश्चेष्टितं च मातुरग्रेऽकथयत । माता पुत्र-विदेश-गमन-वार्तया पीडिताऽश्रुपूर्णनेत्रमाह - वत्स त्वं राजानं पादयोः पतित्वा प्रसादय । यतः उत्तमानां कोपः प्रणामान्तो भवति । कुमारो वक्ति- मातरहं प्रसादयामि परं तथापि न प्रसादं यास्यति ।

यतः

निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणाद् द्वेष-परो हि योऽत्र कथं नरोऽसौ परितोषमेति ॥ १०७

मात्रोचे-वत्स सत्यं वक्षि ।

जलधेरपि कल्लोलाश्चापलानि कपेरपि ।
शक्यन्ते यत्नतो रोद्धुं न पुनः प्रभु-चेतसम् ॥ १०८

अहं किञ्चित् कथयित्वा विलोकयामि । ततः सा राजानमेकान्ते वक्ति -देव एकोऽपराधः सुतस्य सोढव्यः ।

यतः

दोषेणैकेन न त्याज्यः सेवकः सुगुणाधिपैः ।
धूम-दोष-भयाद् वह्निः किमु केनाप्यपास्यते ॥ १०९

इत्यादिबहूक्तेऽपि नाऽमन्यत राजा तद्वचनं । ततः सा प्राह-दे . यदेवं प्रागल्भ्येन नार्हत्येव वक्तुं महिलाजनः । स्त्रियो हि सविनया अल्प-भाषिण्यः सलज्जा परं शोभन्ते, धाष्ट्र्यं तु तासां वचनीयतामेव वहति, परमतीवार्त्तागृहीतयैवैवमभिहितं मया । एवमुक्त्वा निर्गता । ततः कुमारं प्रत्यम्बा कथयति-यदि त्वं यास्यसि तदाहमपि सार्धमागमिष्यामी इति वदन्ती कुमारेण वारितापि न तिष्ठति वक्ति च-

महिलाण होइ सरणं पई व पुत्तो व्व जीवलोगम्मि ।
पइ-पुत्त-विरहियाओ, **...**...** ॥ ११०

पुत्र आह-अहं शीघ्रमागत्य तीर्थमिव तव पादौ निश्चयेन नमस्करिष्यामि ।

यतः

तीर्थानामष्टषष्टिर्या प्रोक्ता स्मृतिषु भारत ।
तेषु भागीरथी श्रेष्ठा ततोऽपि जननी मता ॥ १११
अष्टषष्टिश्च तीर्थानि त्रयस्त्रिंशच्च देवताः ।
षडशीति-सहस्राणि मातुः पादे वसन्ति च ॥ ११२

व्यासेनाप्युक्तं-

वासु महारिसि इहु भणइ, जइ सुइ-सत्थु पमाणु ।
मायह चलण मंताहं, दिवि दिवि गंगा-न्हाणु ॥ ११३

अतस्त्वं पूज्याऽत्रैव तिष्ठ । विदेश-भ्रमण-भू-शयन-पाद-सञ्चरणादि दुःखं मम सार्धं मा सहस्व । तव सार्धं ममाऽपि पाद-बन्धन-दुःखमिति पर्यवसाय सा संस्थापिता । परं मनसि पीडिता वक्ति - वत्स

इक्केण विणा पियमाणसेण सब्भाव-नेह-सहिएणा ।
जण-संकुला वि पुहवी पुत्तय सुन्न व्व पडिहाइ ॥ ११४

ततो मात्रा प्रत्यूषे कुमारः प्रातराशं कारितः ।

यतः

सुधा-मधु-ज्योत्सना-मृद्वी ? [कादिभ्यः] शर्करादपि ।
वेधसा सारमुद्धृत्य विहितं जननी-मनः ॥ ११५

मङ्गलार्थमखण्ड-तर-सहितं दधि भोजितं । कर्पूर-पूर-चूर्णादि-युतं पत्र-बीटकं ददौ । मातरं प्रति प्रणामं [कृत्वा] वधू-सारा-करणं चऽतिदिश्य यावन् निर्गतस्तावता पत्नी पतिमन्वेव निर्गता । कुमारेण च वारिताऽपि । सुकुलीना सा कथयति-कुलस्त्रियः प्राणाः पत्यधीनाः । देशान्तरे गते जीवन्त्यपि मृता । लोकान्तरे तु पत्यौ अनुम्रियते । नो चेच्छृङ्गारादि मुञ्चति । उच्यते तथा -

शशिना सह याति कौमुदी,सह मेघेन तडिद्विलीयते ।
प्रमदाः पति-वर्मगा इति, प्रतियत्नं हि विचेतनैरपि ॥ ११६

पुनः

नर-पाखइ नारी-तणइ लागइ कोडि कलंक ।
आगइ एक मइं सासहिउं मुखि ...★★...★★ ॥ ११७
माय-बाप-बंधव-बहिन मोटी पीहर-वेडि ।
सहकारणिइं परिहरी कंत न मूकउं केडि ॥ ११८
जे सुर-नर-साखिइं करी बापिइं बंधाविउ [देह] ॥
सावलिंगि ते इम भणइ ते किम छूटइ छेह ॥ ११९

आपत्काले हि संप्राप्ते यन् मित्रं मित्रमेव तत् ।
वृद्धि-काले तु संप्राप्ते दुर्जनोऽपि सुहृद् भवेत् ॥ १२०

सा सती या ह्रिया भर्तुः सम्मुखे दिवसेऽनुगा ।
तनुच्छायेव धैर्येण, प्रतीपेऽस्मिन् पुरो भवेत् ॥ १२१

सरसीव पयः पूर्णे, ★★..★★ समं भवेत् ।
नैःस्वै स्व-परयोर्भेदः शुष्केऽस्मिन् मुञ्चतीव यत् ॥ १२२

पङ्गुमन्धं च कुब्जं च कुष्ठाङ्गं व्याधि-पीडितम् ।
आपत्सु विगतं नाथं न त्यजेत् सा महासती ॥ १२३

इति तदुक्ति-युक्तिं श्रुत्वा कुमारः पुनरुवाच - अहं गिरिकन्दरारण्यानिषु भ्रमिष्यामि त्वं तु कथं भ्रमिष्यसि । साऽऽह । वल्लभ देहस्य छाया किमन्यत्र तिष्ठति तथाऽहमपि ।

तथा चोक्तं -

रण्णं पि होइ वसियं जत्थ हियय-वल्लहो जणो वसइ ।
पिय-रहियाणं वसियं पि होइ अडवीइ सारिच्छं ॥ १२४

ततस्तस्याः सार्थागमन-निश्चयं निशम्य सार्थेन चालनायानुमेने कुमारः । ततः सावलिङ्गी श्वश्रूं प्रति-हे मातः ! कदाचित्त्यक्त वधू-धर्मो ममापराधो मर्षणीय इत्यभिधाय पादयोः पपात । ततश्च पत्यनुगमनायाऽनुमन्यस्वेति मुत्कलाप्य पत्या सार्धं चचाल । सवधूक-कुमार-चलनानन्तरं माता -

हियडा फाटि पसाउ करि जीविय काइं करेसि ।
पिय-माणुस-विच्छोहियां, केतां दुक्ख सहेसि ॥ १२५

इत्यादि वारं वारं रोदिति । क्रमेण सखीभिर्वारिता च । कुमार सम्प्रेषणायाऽनुगच्छन्तः स्वजनाः प्रोचुः-अहो दुरात्मना मन्त्रिणा कीदृक् चेष्टितं ।

यतः -

पात्रमपात्रं कुरुते, दहति गुणान् स्नेहमाशु नाशयति ।
अमले मलं प्रयच्छति दीप-ज्वालेव खल-प्रकृतिः ॥१२६

केऽप्याहू राजा कथमेवं निष्कासनं करोति । केऽप्याहुः

आयुषो राजचित्तस्य, पिशुनस्य धनस्य च ।
खलस्नेहस्य ★★★ नाऽस्ति कालो विकुर्वतः ॥ १२७

तेषु पुनरेक आहुर्मन्त्रिणा मुधैवैष उत्पातो विहितः ।

यतः -

एके सत्पुरुषाः परार्थघटनाः स्वार्थं परित्यज्य ये ।
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुष-राक्षसाः पर-हितं स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं पर-हितं ते के न जानीमहे ।। १२८

यद्वा -

सुयणो कह लहइ सुहं जत्थ खलो सामि-कन्न-पडिलग्गो ।
तत्थ पहुस्स य दोसो खलाण पुण एरिसो मग्गो ।। १२९
जं नत्थि जं चन हुअं नहु होही जं च जं न लक्खे वि ।।
तं चिय जंपंति तहा पिसुणा नहु सव्वसारिच्छा ।। १३०
खल-जण-सह-संगेणं पडंति सुयणाण मत्थएऽणत्था ।।
दहवहवयणकयवरा, हरयनिही बंधणं पत्तो ।। १३१

तथा केऽपि -

वाच्छायतां वहसि किं सहकारवृक्ष
निःशेष लोक कमनीय समृद्धि सार ।
प्राप्ते वसन्त समये तव सा विभूतिर्
भूयो भविष्यतितरामचिरादवश्यम् ।। १३२
गयवर गूंगुणि अग्गलउ चंडहरं निवसंति ।
जउ पहुतउ देसंतरि तुह सिरि चमर ढलंति ।। १३३
हंसा जिहि गय तिहि गया महि-मंडणा हवंति ।
छेहु ताहं सरोवरहुँ जे हंसहिं मुच्चंति ।। १३४

इत्यादि वदन्तोऽश्रु-पूर्ण-नेत्राः संप्रेष्य वलितास्ते । मार्गे सदयवत्सस्य चलतः शकुनावली वरीयसी भवति । वधूस्तत्फलं पृच्छति ।

पतिः कथयति -

धम्मलाभ भणती जइ, साहुणि संमुह आइ ।
तउ जाणि सावलि सही, तूसइं तिभुवन-माइ ।। १३५

देवता काऽपि तुष्यति ।

बाला स्वंगि अलंकरी, कोरे वस्त्रि कुमारी ।
तउ जाणहि सुंदरि सही, निश्चिइ लाभइ नारी ।। १३६

मार्गे कन्या-पाणिग्रहणं भवति ।

तरु अरि वाम तेतिर लवइ वड-तडि शिवा रवंति ।
तउ जाणहि सुंदरि सही रिद्धि अनेकि वरंति ।। १३७

संड सारस खर तुरी डावा लाली हुंति ।
एकइं काजिइं नीकल्यां कज्ज सयाइं करिंति ।। १३८

वामंगि वायस उतरइ सावड हुइ श्वान ।
सावलिंगि जाणे सही पगि पगि मिलइं निधान ।। १३९

अधूरां पहिलइ पहरि जांगल जिमणां जाइं ।
तउ जाणहि सुंदरि सही पमिलइं सजण सयाइं ।। १४०

जउ उट्ठ खर डावइ स्वरि करी जिमणइ जाइ ।
सावलिंगि जाणे सही सगपणि कलह कराइ ।। १४१

डाबी छीक धाह जिमणी वारुणी आलउं मांस ।
सावलिंगि जाणे सही सफल मणोरह तास ।। १४२

हय सपलाणउ संमुहउ जल गर्जितः गजराज ।
सावलिंगि जाणे सही रत्रि भमंतां राज ।। १४३

पत्नी पुनः पृच्छति - नाथ क्व यास्यसि । स आह बहवो देशाः सन्ति गमनार्हाः । पत्नी प्राह तत्सत्यं -

बाल-राज्यं भवेद्यत्र द्वैराज्यं यत्र वा भवेत् ।
स्त्री-राज्यं मूर्ख-राज्यं च यत्र स्यति् तत्र नो वसेत् ।। १४४

कुदेशं च कुमित्रं च कुसम्बन्धं कुसौहृदम् ।
कुभार्यां च कुपुत्रं च दुरतः परिवर्जयेत् ।। १४५

तिणि देसडइ न जाईइ जिणि अप्पणउ न कोइ ।
सरि सरि मारग हींडीइ वत्त न पूछइ कोइ ।। १४६

कुमारः प्रवक्ति -

कोऽति-भारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रिय-वादिनाम् ॥ १४७

को धीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतो
यं देशं श्रयते तमेव कुरुते स्वीयं गुणोपार्जितम् ।

यद् दंष्ट्रा-नख-लाङ्गूल-प्रहरणः सिंहो वनं गाहते,
तस्मिन्नेव हत-द्विपेन्द्रसलिले तृष्णां छिनत्त्यात्मनः ॥ १४८

जइ गुण हुइ तउ लब्भइ ठाणउं केण किओ केसरि वण-राणउ ।
अप्पउ अप्पह महिम चडावइ, हत्थी तूर किम दंडह आवइ ॥ १४९

भार्या ब्रूते - एवं सत्यपि मम पितृ-गृहे प्रतिष्ठान-पुरे गम्यते तदा वरं । मम पिता तव राज्य-श्रियं दास्यति ।

यतः -

तुङ्गात्मनां तुङ्गतमाः समर्था मनोरथान् पुरयितुं न नीचाः ।
धाराधरा एव धराधराणां निदाघ-दाहोपशमे न नद्यः ॥ १५०

इति श्रुत्वा कुमारः प्राह - नैवेयं वचनपद्धतिः सत्या ।

यतः -

वियलिय-कला-कलाओ चंदो सूरस्स मंडलं पत्तो ।
निस्सरिओ तारिसओ गय-विहवे को समुद्धरइ ॥ १५१
बज्झ ता कार झभेवि किरि चंद परवासइ लोइ ।
धण-हीणउ मित्ताण हरि मा जाइज्जउ कोइ ॥ १५२
गहणं कलंक-कुसणं डीणिम चंदिम ? हरणं कयंत चंदस्स ।
हरि-हर-धन्नंतरि बन्धवेहि किं होइ पक्खेणं ॥ १५३

पुनः श्वशुरसमीपे न यामि यतः -

वरं मृत्युर्वरं भिक्षा वरं सेवाऽपि वैरिणाम् ।
दैवाद्विपदि जातायां श्वशुराभिगमो न तु ॥ १५४

तथाः -

उत्तमाः स्वगुणै ख्याता मध्यमास्तु पितुर्गुणैः ।
अधमा मातुलैः प्रोक्ताः श्वशुरैश्चाऽधमाधमाः ॥ १५५

तावदेव पुमान् श्लाघ्यस्तावदेव गुणाश्रयः ।
नैव यावत् पर-मुखं प्रेक्ष्यते स्वात्मनः कृते ।। १५६

जिणि दिणि पर-मुहु जोईइ छंडिवि निअ-विवसाउ ।
सो दिवसउ मत उग्गमउ निसि-उच्छउ म विहाउ ।। १५७

स पुनश्चिन्तयति-अस्या वचनं प्रमाणं भवतु, यत इमां सावलिङ्गी पितृ-गृहे मुक्त्वाऽहं मुत्कल-पादः स्वेच्छया पृथिवीं विलोकयामि ।

यतः -

विद्या वित्तं शिल्पं तावन्नाप्नोति मानवो नूनम् ।
यावद् भ्रमति न भूमौ देशाद्देशान्तरं हृष्टः ।। १५८

नानाश्चर्यमयीं पृथ्वीं यो न पश्यति भारत ।
निज-पत्न्याग्रहात्-कानि कौतुकानि स वक्ष्यति ।। १५९

इति विमृश्य प्रतिष्ठान-पुर-मार्गे चचाल । सदयो गच्छंश्चिन्तयति च-या सावलिङ्गी प्राक् सुखासनं विना नाचालीत् साऽधुना पाद-चारेण चलति । पूर्वे मेघा मनस्विन्या मुखमपि नावलोकयन्त, अधुना तातस्य रोषणे च स्व करैः सूर्यस्तां ताडयति । ईदृशे कष्टेऽस्याः कीदृशी मुखच्छायेति विलोकनायेव रविः सम्मुखोऽभूत । अनया हन्त पूर्वं पाटल-शीकर-वासित-तुषारोपम-जलैस्तृष्णा मूलतोऽप्युच्छेदिता तदीर्ष्या-रुष्टा पिपासा स्वावसरं प्राप्यैनां पीडयतीव मार्गे क्षार-भूमिमये छाया-जल-रहिते रण्ण । आगते सावलिंगी तृषाक्रान्ताऽपि पति दुःख-भवन-शङ्कया जलं न मार्गयति, परं प्रकारान्तरेण पृच्छति,

सावलिङ्गी-सामि कुरंगा रण्ण-थलि जल-विणु किम जीवंति ।
सदय : - हीउ सरोवर प्रेम-जल नयणें नीर पीयंति । १६०

सदयस्तच्चित्तज्ञः प्राह-किं तव तृड् बाधते । साऽऽह-बाढं । इति श्रुत्वा चिन्तयति सः

निव-धूया सुकुमारा तिण्हा-छुह-पीडिआ-निविड-तावे
चंकमणं चरणेहिं ही ही विहिविलसिअं विसमं ।। १६१

नूनं शफरीव जलाभावे इयं मरिष्यति । ततो जलं विलोकयामि । तावदग्रे दूर एकां प्रपां पश्यति । शीतल -जल-भृतकलश-पूर्णा वृद्धा स्त्री प्रपापूरिका (? पालिका) । ततस्तां दृष्ट्वा सन् दयितां तत्रैव मुक्त्वाऽग्रे शीघ्रं गत्वा जोत्कार-पूर्वं मातर्मे जलं देहि । मम भार्या तृषाक्रान्ता मार्गे पतिताऽस्ति । वृद्धाऽऽह- देवी-हरसिद्धेः प्रपेयं । अत्र पुण्यं च पापं च सममेव । कुमारः पृच्छति- कथं । वृद्धा वदति-वत्स योऽत्र यावत्-प्रमाणं स्वरुधिरं प्रयच्छति

तस्य तावज्जलं दीयते नाधिकं यतो नेयं पुण्यार्थं प्रपा किन्तु रुधिरार्थं। कुमारः प्राह-वरं रुधिर-मूल्येनापि चेल्लभ्यते न तदा दुष्करम् ।

यतः

खीर-समुद्दं रण्णं पइसिज्जइ हुअवहम्मि जालाए ।
अंगम्मि होइ मरणं किं दुलहं अइ-सिणेहस्स ॥ १६२

देहि मे जलकरकं । करकं भृत्वा चलिता स्त्री । सदयः प्राह-मेऽर्पय करकम् । त्वं वृद्धत्वेन शीघ्रं गन्तुमक्षमा । सा तु क्षमते न विलंबम् । त्वं तिष्ठ । साऽऽह-अहमेव पायिष्यामि। ततः कुमारः शीघ्रतरं व्रजति-साऽपि वेगेन चलन्ती कुमार-पाद-पार्ष्णी प्रहरन्ती स्कन्धे चटितेव पृष्ठतो गच्छति । सदयश्चिन्तयति-वृद्धेयं मम मिलितैवाऽऽगच्छति किमेतत्। तावद्गतः पत्नीपार्श्वम् उक्तं च-तव कृते जलमानीतं। स्त्रिया करको दत्तः । सा मुख-प्रक्षालन-पूर्वं जलं पपौ । स्वस्थाऽजनि । ततो वृद्धा रुधिर-करकं मार्गयति । ततः कुमारेण स्वां नसां उत्पाट्य तत्कर्षणं चक्रे । परं न निस्सरति । देहे कार्पासिकाऽपतत् । विषण्णचित्तः स प्राह-मातरहं स्व-शिर-श्छेदं कृत्वा तव रुधिरं ददामि । कदाचिन्मदभाग्यान्न निस्सरति तदा मम भार्या-पार्श्वे न याच्यम्। निस्सहायाऽबलेयं मोच्या। वृद्धा प्राह-एवमस्तु। ततो यावच्छिरसि खड्गं वाहयति तावत् सा वृद्धा चलत्-कुण्डला प्रत्यक्षीबभूव। भो असम-साहस मा साहसं कुरु । अहमुज्जयिनीपुर्याः प्रतिष्ठान-पुरस्य चाधिष्ठात्री हरसिद्धिर्नाम देवी । उज्जयिनीतो युष्मत्-पुण्यानुभावात्-त्वत्-साहाय्यार्थं तव सार्धमागता । तव सत्त्व-परीक्षार्थं च महा-क्षार-रणं मयैव विकुर्वितम्। महातपात् तव पत्न्यास्तृड्भरान्मुखशोषश्च, प्रपाऽपि च कृता। दृष्टस्त्वं सात्त्विक-शिरोमणिः स्व-वाचा-पालन-शूरः । मया ज्ञातं त्वं कलत्राय रुधिर-मूल्येन जलं गृह्णन्नसि,यत आर्ता दुष्करमप्यङ्गीकुर्वन्ति स्नेहभाजः। परं कार्य सिद्धे तदङ्गीकृतं तृणवद्गणयन्ति प्रायो निःसत्वाः ।

उपाध्यायश्च वैद्यश्च प्रतिभूर्भुक्त-नायिका ।
सूतिका दूतिका चैव सिद्धे कार्ये तृणोपमाः ॥ १६३

त्वं त्वापत्स्वपि वाक्य-पालकत्वाद्वीरः ।

यतः -

जे आवईसु धीरा विहवम्मि अगव्विया अमच्छरिणो ।
पर-वसणेसु सहाया ते पुरिसा पुहवि-लंकरणं ॥ १६४

तेन तुष्टाऽस्मि । वरं वृणु । स प्राह-देवि तव दर्शनेनैव कृतार्थः संपन्नो मार्गये न किमपि। देवी प्राह-न मोघं देवदर्शन । ततो द्यूताधिकरसः प्राह-देवि यदि तुष्टा तदा मम

द्यूते सङ्ग्रामे च जयं देहि। ततः सा पाशक-द्वयं कपर्दिकां कङ्कालोह-क्षुरिकां चार्पयामास। पाशकतः सर्पादिघ्न(?) द्यूते कपर्दिकातः कपर्दक-द्यूते जयः। क्षुरिकातो वैरि-लक्ष-रणे जय इत्युक्त्वा ऽप्यस्मिन् (कस्मिन्नपि) दुष्कर-कार्ये मां स्मरेरित्युदित्वा रुवं तिरोदधे देवी। ततः सुखेन व्रजंश्चिन्तयति-अहो देव्या मम वस्तु-द्वयमपूर्वं दत्तं दारिद्य-हारि राज्य-प्रदायि च।

यतः -

इक्षु-क्षेत्रं समुद्रश्च पाषाणामाकरोऽहो (?)
प्रसादो देव-भूतानां, सद्यो हन्ति दरिद्रताम्॥ १६५

मार्गे पत्नी पृच्छति-किमेतच्छोणित-वचनं कुमारो वक्ति-वारि शोणितमूल्येनानीतं न मुधा। पत्नी प्राह-त्वयेत्थं जल-मानीतं। हा धिङ्मां पत्यनर्थकारिणीमिति स्वां निनिन्द। तथा प्राह-देवेत्थं कष्टेन कस्माज्जलमानीतं। कुमारः प्राह-

स्नेहो न ज्ञायते देवि, प्रणामेन तदुक्तिभिः।
ज्ञायते तु क्वचित् कार्ये सद्यः प्राण-प्रदानतः॥ १६६

तदनन्तरं बुभुक्षिता तृषिताऽपि न किञ्चिदपि मार्गयति। एवं सम-स्नेहौ मार्गे गच्छतः।

चंदो धवलिज्जइ पुण्णिमाए, तह पुण्णिमा वि चंदेण।
सम-सुह-दुक्खाइं जये पुन्नेण विणा न पामंति॥ १६७

एवं क्रमेण गच्छताऽग्रे रम्यं काननं ददृशे।

पूगाशोक-कदम्ब-चूत-बकुलाः खर्जूरिकादि-द्रुमास्
चंचत् पुष्प-फलौघ-पल्लव-युताः शाखोपशाखान्विताः।
यत्रान्तर्जलवापिका जल-भृता पद्मावली-शोभिता
क्रीडन्ति / प्रसभं चकोर-बतका हंसाः सदाराः शुकाः॥ १६८

तत् समासन्नं जल-पूर्णं सरोऽस्ति। तच्च -

कलहंस-कलकल-जलकुर्कुट-संङ्कुलम्।
छबत्कारैः सुकल्लोलैः पालि-भग्नैः सुशोभितम्॥ १६९
सोपानैः परितो बद्धं पद्मिनी-खण्ड-मण्डितम्।
सेतु-युक्तं जलापूर्णं राजते यत् सरोवरम्॥ १७०

तत्र संजात-मज्जनाभिलाषः कान्तया सह कुमारो जल-क्रीडां विधाय पाल्युपरि सहकार-वृक्षस्याति-सुपक्व-फलैः कृत-प्राण वृत्तिस्तच्छयायामुपविशति। तददूरे स्वर्ग-भवन शोभं श्रीयुगादीश-प्रासादं पश्यति। मण्डप-श्रेणिस्तम्भ-परम्परा स्थित-शालभञ्जिका-सुवर्ण-कुंभ-द्वासप्तति-देवकुलिकाभिरामम्।

ततश्चिन्तयति-निश्चितं जैन-प्रासादोऽयं नहि शैवादि प्रासादस्तेषु बहु-मण्डप-भवन-देवकुलिका-श्रेणि-शोभाभावात् । अत सानन्दं तत्र देवनत्यर्थं गतो मध्ये स्त्रैण - कलकलं श्रुत्वा जालिकान्तरे विलोकयति । प्रासादान्तः स्त्री-राज्यमिव दृष्ट्वा सदयः पत्नी प्राह- अहं । मध्ये कथं व्रजामि । केवल-स्त्री-मध्ये मम गमनं नार्हति । त्वं व्रज । मुख्या काऽत्र किमर्थं वा तिष्ठन्तीमा इति ज्ञात्वा देवं च नत्वा समागच्छेति । सा भर्तुरादेशं प्राप्य मध्ये जगाम । तत्र काश्चन वीणा-नाद-पूर्वं गायन्ति । केसर-चन्दन-पूरित-कच्चोलक-कराः काश्चन देवं पूजयन्ति । तास्वेका लीलावती नामाऽबला स्वरुप-सौभाग्य- रञ्जित-रम्भा श्रीजिनाग्र उपविष्टा ध्यानं करोति । सावलिंगी तत्समासन्ना पञ्चाङ्ग-प्रणामेन श्रीयुगादीश्वर-देवं नत्वा स्तौति ।

नान्यं वदामि न भजामि न चाश्रयामि
नान्यं शृणोमि न यजामि न चिन्तयामि ।
लब्ध्वा त्वदीय-चरणाम्बुजमादरेण
श्रीवीतराग भगवन् भज मानसं मे ॥ १७१

इति । ततः सावलिङ्गी ध्यानस्थां बालामुवाच-सखि वन्दे । तदा सावलिङ्गीं नवीनां सुरुपां वैदेशिकीं ज्ञात्वा ध्यानं मुमोच -

यतः -

अभिनव-जनावलोके, विदेश-वार्तादि-कौतुक-प्रश्ने ।
देशाचार-विचारे कस्य मनो नोत्सुकीभवति ॥ १७२

ध्यानकर्त्री हस्त-योजनेन सावलिङ्गीं वन्दित्वा पृच्छति - हे सखि त्वं कुत आगता । कथमेकाकिनी सावलिङ्गी प्राह-अहं मालवकदेशादुज्जयिनीत आगता । न चाहमेकाकिनी । मम सार्थोऽस्ति यो भवे भवे स एव भूयात् । सावलिङ्गी पुनस्तां पृच्छति-का त्वं । किमत्र शून्यारण्य-गत प्रासादे ध्यान-लीना स्थिताऽस्ति । ततः सा प्राह-मद्वार्तां शृणु । इतः पञ्च क्रोशे द्वारपुर्यस्ति ।

भारती-स्पर्धया यत्र, लक्ष्मीं प्रतिगृहं स्थिता ।
यद्वाऽति सुगुणं चक्रे, श्रीराश्लिष्यति तं खलु ॥ १७३

तत्र धरवीरो नाम नृपतिर्यत्करे लग्नाऽसिलता-वधूर्बहुवैरिकान् गृह्णन्त्यपि नाऽसतीभावमाप्नोति । तस्य धारिणी नाम पट्ट-राज्ञी । तस्याः पञ्च-पुत्रोपरि जाताऽहं लीलावती नाम पुत्री । यौवनस्था पितुर्वर-विषय-चिन्ता-शल्य-प्रदा बभूव ।

यतः -

जणयं दुरंत-चिंता - पारावारम्मि खिवइ वड्ढंती ।
इक्का वि धुवं कन्ना ससल्ल-हिययं कुणइ निच्चं ॥ १७४

अन्यदा राज-सभायां राजाङ्के स्थिताऽहं बन्दि-जन-मुखात् प्रभुवत्स-राज-सुतस्य सदयवत्सस्य रूप-सौभाग्य-शौर्यादि-गुण वर्णना-प्रपञ्चम श्रौषंम् । ततो मया मनसि चिन्तितं-यदि स एवंविध गुण-पात्रमस्ति तदा स एव वरो मेऽस्त्विति । षण्मासान्त स्तत्प्राप्ति-कृत-निश्चयाऽत्र स्थिताऽस्मि, यत इदं कामिक-तीर्थं, अस्य देवस्याधिष्ठायिकैः पूरित-सर्व-जनाशं-उक्तं च -

ओषधीनां च मन्त्राणां, सत्य-भक्तेः सुपर्वणाम् ।
असाध्यं नाऽस्ति लोकेऽत्र यद् ब्रह्माण्डस्य मध्यगम् ॥ १७५

यदि षण्मास-मध्ये सदयवत्सो मिलति तदा स । मे वरोऽस्तु । नो चेत्तदाऽत्र काष्ठ-भक्षणं करोमि । अद्य तु षष्ठमासस्यैकोनत्रिंशत्तम दिनम् । स तु मम न मिलितः स्वकर्मदोषतः ।

यतः -

समीहितं यन्न लभामहे वयं प्रभो न दोषस्तव कर्मणो मम ।
दिवाऽप्युलूको यदि नावलोकते तदा स दोषः कथमंशुमालिनः ॥ १७६

पत्ते वसंतमासे- रिद्धिं पावंति सयल-वणराई ।
जं न करीरे पत्तं ता किं दोसो वसंतस्स ॥ १७७

सार्थं सती लीलावती ससंभ्रमा पृच्छति । यतो यावान् संभ्रमस्तावान् स्नेहः ।

आचारः कुलमारव्याति देशमाख्याति भाषितम् ।
संभ्रमः स्नेहमारव्याति, वपुरारव्याति भोजनम् ॥ १७८

सोऽत्र कथमागतः सावलिङ्गी प्रोवाच-तवाराधनतुष्टेन देवेन पितुः कोपमुत्पाद्य तव पाणिग्रहणार्थमत्रानीतः ।

अत्र

केवल XX ..... XX .....XX ..... XX ... XX

.... XX ... XXX गिरिभिर्न समुद्रैः ॥ १७६

ततो व्याकुलचित्तेन कुमारेण रात्रौ हरसिद्धिः स्मृता । साऽगत्य प्रोचे-मा चिन्तां कुरु । प्रातर्बहु स्वर्णं दास्य इत्युक्त्वा गता सा । प्रातर्नृपपुत्रा भगिनीपतिना सह द्यूतेन क्रीडयित्वा

स्वहस्त-कलया तं निर्जित्यास्य पार्श्वेऽपरवस्त्वभावात् तत् -खड्गमेव गृह्यते, पश्चादस्मत्पादयोः पतित्वा मार्गयिष्यति तदाऽर्पयिष्यते नाऽन्यथेत्यादि हास्यकरणार्थं तत्राऽऽययुः। तैः प्रणाम-करण-पूर्वमुक्तो-द्यूतेन क्रीड त्वामस्माभिः सह। कुमारः प्राह-एवमस्तु। परं पण-मोचने वस्तु किमस्तु। तेऽप्याहुः तवः खड्गमस्माकं सुवर्णं पण-मोचनेऽस्तु। सदयो मनस्यचिन्तयदेत-शालका हास्यकरणार्थमागताः सन्ति। मम तु जय एव भावी। एते जिता अपि सुवर्णं नार्पयिष्यन्ति। हास्येनोत्तारयित्वा मोक्षयन्ति। तेन हस्तगतमेव सुवर्णं करोति। अतोऽवक्। तर्हि स्वर्णमस्मत्पार्श्वेऽत्र मुञ्चत। तैस्तथाकृते देवी-वरदानानुभावाद् द्यूते स्वर्णकोट्यो जिता बन्धुमोक्ष XX XX XX चतुरेण कुमारेण

तदा राजकुमारेण हृष्टोऽसौ। तदा ते राजकुमाराः स्वयं धृष्टा हास्यकरणं मस्तकेऽपतन् इति चिन्तयन्तो मौनभाजोऽभवन्। धूर्तो घृष्ठे हि मौनभाग् गृह्णाति स्वर्णकोटीर्दाक्षिण्यान्न मुञ्चति।

यतः -

उल्लोचं प्रीति-दानं च, द्यूत-द्रव्यं कुशीदकम्।
सुभाषितं च चौर्यं च, सद्यो गृह्णन्ति पण्डिताः॥ १८०

तेन स्वर्णेन सदयः प्रीणयति मार्गण-गणं। यतः -

यैश्च दत्तानि दानानि, पुनर्दातुं च ते क्षमाः।
शुष्कोऽपि हि नदी-मार्गः खन्यते सलिलार्थिभिः॥ १८१

राजा जामातृसहितः स्वपुरीमागात्। स्थापितो जामाता कियन्ति दिनानि। एकदा राजा जामातृ-सहितो राजवाटिकायां व्रजन् वन-मध्ये श्रीधर्मघोषसूरीश्वरान् परिच्छद-युतान् दृष्ट्वा वन्दनाय गतो। वन्दिता गुरवः। यतो यतीनां प्रथममाद्येयं धर्मातिथिर्जनेषु धर्मोपदेश-प्रदानमिति गुरुभिर्धर्मोपदेशोऽदायि तथा -

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता,
विद्यायां व्यसनं स्व-योषिति रतिर्लोकापवादाद्भयम्।
भक्तिश्चार्हति शक्तिरात्म-दमने संसर्ग-मुक्तिः खले,
येष्वेते निवसन्ति निर्मल-गुणास्तैरेव भूर्भूषिता॥ १८२
पुण्यादेव समीहितार्थ-घटना नो पौरुषात् प्राणिनां,
यद् भानोर्भ्रमतोऽपि नाऽम्बर-पथे स्यादष्टमः सैन्धवः।
स्वस्थानात्पदमेकमप्यचलतो विन्ध्यस्य चाऽनेकशो,
जोड्यन्ते मद-पालिताः शुभ-यशः-श्री-लम्भिनः कुम्भिनः॥ १८३

अपि लभ्यते सुराज्यं, लभ्यन्ते पुरवराणि रम्याणि ।
नहि लभ्यते विशुद्धः, सर्वज्ञोक्तो महाधर्मः ॥ १८४

दारि द्यात्त-समा धर्माः, परे स्वल्प-फल-प्रदाः ।
कुत्रिकापण-तुल्यस्तु, जिन-धर्मः सतां मतः ॥ १८५

स्वल्पोऽपि जिनधर्मो विहितो मृगाङ्कस्येव परम-सौख्य हेतुः । तथा हि-

## मृगाङ्क-पद्मावती -कथा

पूर्वे वाराणस्यां पूर्यां व्यवहारि-धुर्यो जिनदत्त-श्रेष्ठी जिन-धर्म-वासित-सप्त-धातुः । श्रीकान्ता तस्य सहचारिणी सुशीलादिगुण-श्रेणि-विभूषित-गात्रा पुत्रं विना दुःखपूर्णा । तां दृष्ट्वा प्राह-प्रिये किं तेऽद्य श्यामाननं दृश्यते । सा प्राह- स्वामिन्नपरं कारणं किमिति पुत्ररत्नं विना । श्रेष्ठी प्राह-दुःख-करणेन किम् । पुण्येनैव समीहितसिद्धिः । यतः -

रम्येषु वस्तुषु मनोहरतां गतेषु रे चित खेदमुपयासि वृथा किमेवम् ।
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा पुण्यं विना नहि भवन्ति समीहितार्थाः ॥१८६

तेन पुण्यं कुरु । ततः श्रेष्ठी सभार्य : श्री जिन-पूजनादि नित्यं करोति । तेनान्तरायकर्म क्षयं जगाम । एकदा रात्रौ कला-पूरित-पूर्ण-मृगाङ्कं श्रीकान्ता स्वप्ने ददर्श । प्रातः श्रेष्ठिनेऽकथयत् । सोऽपि पुत्र-जन्म-फलं प्रोचे । साऽपि हृष्टा पुण्याधिकं पुरुषं गर्भं बभार। नवमासैर्जन्माभूत् । एकादशमे दिने स्वप्नानुसारेण मृगाङ्क इति नाम चक्रे पिता । एक एव पुत्रस्तेनाऽप्यति-वल्लभः । कालेन कला-ग्रहण-योग्योऽभूद् उपाध्यायार्पितः । तत्रैव पुरेऽर्हद्दास-व्यवहारी जैनः । शीलवती च पत्नी । पद्मावती पुत्री बहुपुत्रोवरि जाता । साऽति-रूप-निर्जित-सुरसुन्दरी-रूपा । साऽपि लेख-शालायां मुक्ता । द्वावप्येक-शालायामुपाध्याय-पार्श्वे पठतः । प्रज्ञाप्रकर्ष-चमत्कृत-जन -हृदयौ मिथो-मैत्री- भाजौ यां सुखभक्षिका-मानयतस्तौ मिलित्वा भक्षयत एवं प्रीति-परौ स्तः। एकदा पद्मावती पट्टिका-मञ्जनाय गृहे गच्छन्ती पट्टशालास्थेन पित्राऽऽकारिता पृष्टा तत्र पाठं पठिता च । हृष्टेन पित्रा नवतिः कपर्दका नापाकरूपत्वात् प्रीत्याऽर्पिताः । ततः स्व-वस्त्राञ्चले बद्धवा लेखशालायां गता, उत्तरीय-वस्त्रं त्यक्त्वा घोटके संस्थाप्य हस्तलेखं लिखति । मृगाङ्केन तद्वस्त्रं दृष्ट्वा ते गृहीताश्छोटयित्वा तस्या अकथयित्वैव । पूर्वं च प्रीतिभावात् । तैः सुखभक्षिकामानीय भक्षिता द्वाभ्यां । क्षणान्तरे पद्मावत्या ते स्वकपर्दाः सम्भालितास्तस्मै दर्शनाय । न दृष्टाः । पृष्टं च क्व मे कपर्दकाः । मृगाङ्केनोक्तं मया गृहीत्वा सुखभक्षिकाऽऽनीताऽऽवाभ्यां भक्षिता च । सा प्राह-आः मया तैराभरणानि चिकीर्षितान्यभूवन । तेन पृष्ट-मेतैः कथममूल्यान्याभरणानि भवन्ति । सोचे । एकया बुद्धिमत्या पञ्च-व्रीहिभिर्मूटकशतानि व्रीहीणां कृतानि । ततस्तेन चिन्तितम्-मया कपर्दा

गृहीताः परमेतस्या अरोचमाना अभूवन । तन्न भव्यं कृतं मया । नवीना आनाय्याऽर्पयति । सा न गृह्णाति । कालेन विस्मृतिं गतम् । द्वयोरपि परस्परं प्रीतिस्तथैव परं सहृदये भक्षित इवास्थात् । कालेन पठित्वा तावुत्तीर्णो । एकस्मिन्दिने तेनैवोपाध्यायेनानयोर्विवाहार्थं तत्पितरः पृष्टाः । तैरुक्तं-वर-कन्ययोस्तादृक्-प्राप्त्यभावेनैव स्थिताः स्म । उपाध्यायेनोक्तं-यदि कुरुत तदा वर-कन्यानुयोगं वरतरमहं कथयामि । तैरुक्तं-यूयमेव मेलयत । उपाध्यायेन तयोः पित्रोः कथयित्वा पूर्व-प्रीति-सादृश्यादि-सप्त-गुण कथनान्मृगाङ्क-पद्मावत्यो-विवाहो मेलितः । महता महेन तदुत्सवोऽप्यजनि । तथैव प्रीतिरभूत् एकदा मित्र-गोष्ठ्या स्वधनोपार्जन-विचारैर्मृगाङ्को मित्रैः सह सिंहलद्वीप-गमनाय पित्रोर्विज्ञप्तिमकरोत् । तेऽप्याहुः सृतं तव धनोपार्जनेन । एक एव त्वमस्माकं सुतः । पुराऽपि धन-संख्या नाऽस्ति तव । गृहे सुखं भुंङ्क्ष्व निश्चिन्ततया । स चाऽतीव विदेशं जिगमिषुर्बाढं नित्यशोऽकथयत् । तैश्चिन्तितम-एषन स्थास्यति । ततोऽनुज्ञातस्तैः क्रयाणकैर्वाहना न्यष्टादश पूरयामास । ततो भार्या-मुत्कला पिता । सा वक्ति-देहच्छायावदहमन्वायास्यामि । पत्योक्ता-तव विदेशे दुष्करं । सा वक्ति-जीवितव्यं वा मरणं वा व्यसनं वा यद्भवति तद्भवतु तथापि सार्धमागमिष्यामि । बहु पर्यवसापिताऽपि न स्थिता । सार्धं च चचाल । स्वजनाः कियन्तं पन्थानं जल-पथेन संम्प्रेष्य पश्चाद्वलिताः । वाहनानि सुवात-प्रेरितानि समुद्र-मध्ये बहु-योजन-शतानि जग्मुः । अन्तर्द्वीपागमे पाञ्जरीस्थेन नरेणोक्तम् जलादि-ग्रहण-योग्यो द्वीप आगतोऽस्ति । लोकैरुक्तम्-उत्तीर्यन्तामुत्तीर्यन्ताम् । ग्रहीष्यते जलादिकं । वाहनानि नाङ्गरित्वा जना उत्तीर्णाः । मृगाङ्कोऽपि पत्नी-सहित उत्तीर्य द्वीप-विलोकनं कुर्वन् दूरे जगाम । लोकास्तटके स्नान-धोवन-परा अभूवन् । मृगाङ्को लता-मण्डपे गत्वा स्थितः सुप्तः । पत्नी सुप्ता निद्राणा च । तावता पूर्व-भव-कर्मवशान्मृगाङ्केण गूढ-रोषेण चिन्तितम्-मुञ्चाम्येनामत्रैव । ते कपर्दास्तद्वस्त्राञ्चल-ग्रन्थे बद्ध्वा चिट्ठडिकां लिलेख यथा-अत्र स्थितैतैः कपर्दैराभरणानि कार्ये । पूर्वचिकीर्बुद्ध्ये । इति लिखित्वा प्रच्छन्नमुत्थाय त्वरित-पदैरागच्छन लोकैः पृष्टः । किं किं । स रुदन्निवदन् भार्या राक्षसद्वीपेऽत्र राक्षसैर्भक्षिता । यूयं नश्यत नश्यत । ततो लोका भय-भ्रान्ताः शीघ्रं प्रवहणानि पूरयित्वा चेलुः । समागताः शोकं कुर्वन्मित्रैः पर्यवसिताः । ततो बह्वी-वेलानन्तरं सा पद्मावती जजागार । पतिं न पश्यति । सर्वत्र विलोकयति वक्ति च-हे समुद्र ममवैरिवद्-भूत त्वन्मध्य एव पतित्वा प्राणान्त्यजामि । इति विचार्य पतनाय स्व-वस्त्रं दृढीकरोति । तावता ग्रन्थिः करे लग्नाः चन्तितम्-एष कीदृग । ग्रन्थिः । छोटित्वा विलोकयेयम् । सप्तनवतिः कपर्दा दृष्टाश्चिट्ठडिका च वाचिता । तत्र लिखितं वज्रातिपात-सदृशं व्यतिकरं ज्ञात्वा चिन्तयति - हा धिक् ! पुरुषाणां कीदृग्-गूढ-दीर्घ-रोषित्वं । अन्तर्गूढ निबद्धहृदयाः प्रायो नरा मानिनः तत्सत्यमेव । कस्य कालस्योक्तं कस्मिन् काले स्मृतिपथे समानीतं । इयन्ति दिनानि हृदये कथंधृतं ।

अथवा

देहो हिययंवाणि तिण्णि वि चिय निट्ठुराणि पुरिसाणं ।
हय-विहिणा विहियाइं न याणिमो के हिं वि दलेहिं ॥ १८७
x x x . . . . x x x, दलेहिँ अइ निठ्ठुरेहिं निम्मवियं ।
तत्तो अवसेसेहिं कुलिसं पि हु निम्मियं मन्ने ॥१८८

ततः साऽपि मानवत्यहङ्कृतितश्चिन्तयति त्वं राजा वयमप्युपासित-गुरु-प्रज्ञाभिमानोन्नत इति । तन्मनोदुःखं निवार्य साहसमवलम्ब्य चिन्तयति-अयं विस्मृतानत्य- ज्ञात्वैव त्यक्ता । नमस्कारौ प्रतिष्ठाप्य -

उपसर्गाः क्षयं यान्ति छिद्यन्ते विघ्न-वल्लयः ।
मनः प्रसन्नतामेति पूज्यमाने जिनेश्वरे ॥१८९

इति ध्यानेन भक्त्या पुष्प-फलैः प्रपूजयति । धर्म-ध्यान-परा स्वंकर्म-विपाकं चिन्तयति ।

जइ पइसइ पायाले ॥ १९०
किं मुससि ॥ १९१
हसंतो हेलपा ॥ १९२
धम्मेण विणा जइ चिंतिआइं ॥ १९३

इत्याद्युपदेशैः स्वं संधीर्य पापं निर्जरयति । समुद्र-तटे षट्पूलकमालां कृत्वा प्रौढ-वंशाग्रे बध्नाति । समुद्रान्तः-पतितं चिह्नमिति । रात्रौ वृक्षाग्रे मालकं कृत्वा स्वपिति श्वापदभयेन । फलाहारैर्दिनान्यतिवाहयति । इतश्च सिंहस्थल-द्वीपतः पद्मनाभ-सार्थवाहस्य सप्त वाहनानि तन्मार्ग आजग्मुः । तद्ध्वज-चिह्नं दृष्ट्वा लोकैरुक्तम्-कोऽप्यत्र मनुष्योऽस्ति । अत्राऽऽनीयते । अन्यथा जल-पथे क्षेमं न स्यात् सांयात्रिकाणाम् मुख्य-व्यवहारिणा जनाः प्रेषिताः । तानागतान् दृष्ट्वा भयातुरा चिन्तयति-ममैते किं करिष्यन्ति । तैरुक्तं मा भैषीः । तवाऽऽनयनायागताः स्म । तत आनीय व्यवहारिणे दत्ता । पृष्टं स्वरूपम्-तेन । तया पोत-भङ्गाद्युक्तं न पतित्यजनं । भोजनमोदकादि दत्तम् । एकान्तरापवासान् x x x तद्रूपमोहितः स तां प्रार्थयति-त्वत्पतिस्तु समुद्रे मग्नः ततस्त्वं मम गृहस्वामिनी भूत्वा सुख-सर्वस्वं भुङ्क्ष्व । सा न शृणोति । तदनन्तरं स्वदेह-कान्ति कृशतायै क्षपण-द्वयेन भुङ्क्ते । स प्रत्यहं प्रार्थनेन । तामुद्वेजयति । ततः सा जिन-पूजानन्तरं वक्ति- हे श्री ऋषभ, दुष्कर्म-चूरक तव पूजाकर्त्र्या ममेदृग्दुःख विध्वंसय । इति स्मरन्त्यास्तस्याश्चक्रेश्वरी प्रादुरभूत । देवी प्राह-वत्से तव शील-प्रभावेण जिन-भक्त्या च तुष्टाऽऽगता । तयोक्तम्-मम शीलरक्षा स्यात्तथा कुरु । ततस्तया वातप्रयोगेण तस्य सप्त वाहनानि भग्नानि । पद्मावत्या फलकं प्राप्तम् । दिनत्रयीं कल्लोलैः प्रेरिता जलधो स्थिता । मत्स्यैरुपद्रुताऽपि देवतया समुद्रपतिताऽपि नोद्धृता । त्रिदृशैरपि

प्रतीकारो न भवति पापकर्मणम्। ततो जल-गजेनोल्लल्य नभोङ्गणे क्षिप्ता। पतन्तीं वैताढ्यसुखनूपुर-वासिना मणिकुण्डली-नाम्ना विद्याधरेश्वरेण गृहीत्वा स्वगृहे नीत्वा सहस्र-पाक-तैलाद्यभ्यङ्गेन तद्देहं सज्जीचकार। मनोज्ञाहारै रुपं प्रादुरभूत्। सोऽपि तां तताविध-रूपां दृष्ट्वा रागान्धः प्रार्थयति-मन्यस्व माम्। विद्याधरीवृन्द प्रणतपादा x x x x भुङ्क्ष्वत्यादि वागुक्तिभिः। यतः -

नवि अत्थि नवि य होही, सो जीवो तिहुयणम्मि सयलम्मि।
जो जोव्वण मणुपत्तो, वियार-रहिओ सया होइ ॥ १९४

मांसं मृगाणां दशना गजानां, चर्म द्विपारेः सुफलं तरूणाम्।
वित्तं नराणां वपुरङ्गनानां, गुणाधिका वैर-करा भवन्ति ॥ १९५

सा तं प्रतिबोधयति :-

वरमिह समुद्द-पडणं जलण-पवेसो अ सत्थ-धाओ अ।
आजम्म-निक्कलंकं न सील-रयणं नियं भग्गं ॥ १९६

लज्जिज्जइ पमयाले ॥ १९७

कं चातं ॥ १९८

इत्यादि वाक्यैःस्त्वं मे तातो जीवितदानात्। तवाऽनेका रम्य-रूपा भार्याः सन्ति। किं मम प्रार्थनया। पादयोः पतित्वाऽहोऽहं तव पुत्री। पुत्र्या यद्यद्विधीयते तत्तत्कुरु। इति विनय-चातुर्यादि-गुण-रंजित स्तच्छील-हृष्टायास्तस्या वैराग्यवाक्यैः प्रतिबोधित-हृदयस्तां पुनः पादयोः पतित्वाऽहोऽहं तव पुत्रीत्वेन प्रपन्नवान। स वक्ति-वत्से स्त्री राद्धं धान्यम्। क्षणविनश्यति। सा वक्ति-तव पितुः प्रसादेन सर्वं रुचिरं भविष्यति। ततो विद्याधरेणौषधि-द्वयं दत्तं तस्यै। एकेन रूप-परावर्तो द्वितीयेनेष्टार्थ-सिद्धिः। तथाऽदृशीकरणाञ्जनं विघ्नहरमङ्गुलीयकं च। एकदा तया विद्याधराग्र आमूल-चूलं स्व-स्वरूपं प्रोक्तं पतिमोचनादि। अतो मां सिंहल-द्वीप-मार्गस्थ-पुरे मुञ्च, यथा तस्य तत्राऽऽगतस्य स्व-बुद्धि-वैभवं दर्शयामि। तेन तत्र वेलाकूल-पुरे सुंसमार-पुरे मुक्ता, ओषधि-बलेन नर-रूपं विधाय पुरान्तर्गतो दिव्य-नेपथ्य-धरो हट्ट-मार्गे गच्छन् नेकच्यवहारिणो हट्टे गत्वोपविष्टः। वार्तालापैः प्रमुदितेन व्यवहारिणा भोजनाय निमन्त्रितः। पुरुषेणोक्तमहं कियत्कालं तिष्ठासुरस्मि तेन रन्धनी-गृहं दर्शयत यथा तत्र कियन्ति दिनानि सुखेन तिष्ठामि। श्रेष्ठिना तथा कृते समागत इत्युक्त्वा प्रणामं चकार यच्छीलवता पुंसा स्त्रियं दृष्ट्वा त्रिधा नात्रक-सम्बन्धो गणनीयः। वृद्धां प्रति माता समानवयसं प्रति भगिनी लध्वीं प्रति सुतेति। तया पुत्रत्वेनाऽङ्गीकृतः साहसाङ्कः स्वनाम दधौ रूपेण कलाभिश्च सर्वं पुरीलोकं विर-मापयति। एकदा तेन तस्याग्र उक्तं द्युम्नं गृहाणैक तालवृन्तमानंय वर्यतरं पञ्चविधवर्णकं च। तया तथा कृते स तदेव नगरं करि-तुरग-शाला-हट्ट-श्रेणि-

राजभवन-गढ-मठ-प्रासादादियुतं स्वकलया तत्र वीजणके लिलेख जन-वित्त-चमत्कार-कारकं। वृद्धायाः प्रोक्तं मातरयं तालवृन्तो नगर-मध्य अष्टोत्तर-शत-रूप्य-टङ्कै व्यतितव्यो न न्यून-मूल्येन। यदि कोऽपि न गृह्णाति तदा पश्चादानेयः। तया तथा कृते कोऽपि न गृह्णाति-मुधाऽल्पकार्ये को धन व्यंय करोति। राजसभायां वार्ताऽभूत। नरवर्मराज आह- नगरस्य लज्जेयं यन्नगराद् वस्तु पश्चाद्याति। स्वभाण्डागारिण उक्तं-त्वया स तालवृन्तस्तदुक्तमूल्येनानेयः। तेन तादृग्-मूल्येन गृहीत्वा राज्ञेऽर्पितो। राजा तं तालवृन्तं तथाविधं दृष्ट्वा चमत्कृतः प्रोचे-एतत्-तालवृन्त-चित्रकरमानय। तेन सा वृद्धा तत्र राजभवन आनीता। राज्ञा पृष्टा सा-केनेदं चित्रकर्म कृतं। सा वक्ति-ममाङ्गजेन। राजाऽऽह-इयन्ति दिनानि स न प्रादुरभूत्। सोचे-अधुनाऽऽगतो जिह्ममानितोऽङ्गजः। राजाऽऽह-सोऽत्रप्रेष्यः। तया ओमिति भणित्वा गृहे गतया स प्रेषितो राजजनेन सह राजभवने गतो नृपसमीपे। पृष्टं राज्ञा कलाविज्ञानं। तेनोक्तं-किमेतत् ततो राज्ञापूजितो मानितः। प्रत्यहमत्र त्वयाऽऽगन्तव्यमिति निश्चय-कारापणपूर्वं स विसर्जितः। नित्यं तत्र गमने राजा तुष्टस्तदुक्तशास्त्रविचार विनोदवार्ताभिः। एकदा हृष्टेन राज्ञोक्तं-अन्यत् किमपि वेत्सि। सोऽवक चतुः षष्टिः कलाः स्त्रीणां द्विसप्ततिः पुंसां च कला वेद्मि। यद्वा तत्राऽस्ति यत्र वेद्मि। ततो नृपतिराह-मम xxxx सा न गृह्णाति। कालेन विस्मृत्य गतम्। द्वयोरपि परस्परं प्रीतिस्तथैव। परं सहृदये भक्षित इवाऽस्थात्। ततः कालेन पठित्वा ताम वध्यायत। ततः स छन्दो-लक्षण-तर्क- धनुर्वेद-नृत्य-दण्डायुधादि सर्वमध्यापितवांस्तां स्तोकैर्दिनैः। तुष्टे नृपः प्राह-दश ग्रामा उपदीक्रियते ते। यद्दीयते तत् स्तोकं तथाऽपि दशग्रामादिकं किमपि गृहाण। स न गृहणाति। नृपः प्राह-मुधा ओलग-कारापणं न यशसे मम। बहूक्ते स वक्ति- एवं चेततदा देश-दाण-मण्डपिकां देहि। सा राज्ञाऽर्पिता। कागदे लिखितं-वर्षत्रयं यावत् कोऽप्यपरो न गृह्णाति। यस्य तु दाणं मुञ्चामि xxxx तस्य सर्वस्वं गृह्णमि। तथा राज्ञा रावा कस्यापि न श्रोतव्या। एवं कृते सति स देशधनिक इवाऽजनि बहुपरिवारयुतश्चाऽभूत। वर्षद्वयेन बहुकोटयो धनस्याजिताः। ततः स्त्रीयोग्यान्याभरणानि पुरुषयोग्यान्याभरणानि च नामाङ्कितानि कारयामास। इतश्चैकदा राज्ञः पुत्री सुरसुन्दरी तद्रूपं दृष्ट्वा काम-राग-ग्रहिला तत्-पाणिग्रहणायाग्रहपराऽभूत। राज्ञा तज्ज्ञात्वा विवाह-करणाय स मण्डपिकाधिपः प्रार्थितः। परं स्व-स्त्री-रूपत्वेन न मन्यते स्वं च न प्रकटयति। अतिकदाग्रहेण त्वग्रेतनमेकं xxxx विचार्य मानितं पाणिग्रहणम्। पर मधुनाऽष्टादश-तीर्थ-यात्रा-करणे ममाऽभिग्रहोऽस्ति। तत् करणानन्तरं पाणिग्रहणं करिष्य इत्युत्त्वा पर्यवसापयति राजादीन।

इतश्च तृतीय-वर्षस्य षण्मासेषु गतेषु मृगाङ्कोऽपि सिंहलद्वीपतो बहुकोटि-मितानि धनान्यर्जयित्वा तत्रागांत् नाङ्गरितानि वाहनानि। तत्र तटे। दाणमदत्त्वाऽग्रतश्चलितुं न शक्नुवन्ति। ततो नृपं नत्वा मण्डपिकाधिपतिपार्श्वेजगाम। तेन मृगाङ्क उपलक्षितः स्वपतिःमृगाङ्केन नररूपत्वात्स नोपलक्षितः। मृगाङ्केनोक्तम्-अस्माकं दाणं वालयित्वा वाहनानि मुत्कलानि कुरु

यथाऽग्रतश्चल्यतेऽविलम्बेन। मण्डपिकाधिपेन बाढमादर-परेण भोजनानन्तरं तटे गतास्ते सर्वेऽपि वाहन- वस्तु-जातं विलोकयन्ति। उक्तं च - सत्यं यदि वदिष्यथ तदाऽर्धदाणेन छुटिष्यथ। स्तोकेऽपि कूट-कथने समूलं यास्यत्यत्र लिखितं समस्ति। तेन सत्यमेव वाच्यं लिखनीयं च। एवमुक्तेऽपि ते वणिजः कथं शुद्धं लेखयन्ति। प्रायो दाण-कारापणे गृह-धन-संख्यायां च कूट-भाषका एव जनाः स्युः। तैः सर्वं लिखितम्। मण्डपाधिपो धूर्तो वक्ति-पाटयन्तु मदृष्टावस्त्र वाहनानि। ततः पाटितानि तद्धृदयानीव तानि। मध्येऽलिखापितानि मौक्तिक-विद्रुमादीनां पेटा-शतानि स्वर्ण-कलशाश्च बहवो निःसृता। अपरमपि सर्वं द्विगुणं च पश्यति। अर्ध-दाणग्रहणेऽपि त्वमेवं कूटं वदसीति बाढं तर्जयित्वा X X X पातितास्ते सर्वेऽपि। मृगाङ्कस्तेन बाढ मुपलम्भितो बन्धयित्वा चतुष्पथे नीत्वा नीरोत्तारः कृतो लोकसमक्षं कोष्ठके क्षिप्तः। तत्सेवकजनाः साहसाङ्काय विज्ञपयन्ति मृगाङ्क-मोचनार्थम्। एषाऽपकीर्ति देशान्तरे यास्यतीति राज्ञा निवेदिते कथमपि मुक्तः स स्वगृहे भोजनाय नीतः। सर्वर्वानपि साहसाङ्केन स्नानदेवार्चनादिभिस्तान् प्रमोद्य सार्थेन भोजनायोपवेशिताः। वर्यतर-भक्ष्य-भोज्यादिभिः प्रीणयति। ततो वाहनसत्कं वस्तु-जातं स्व-गृह आनाया स्थापितं। मृगाङ्कोऽपि द्विगुण-त्रिगुणादि-दानेन मोचनाय कथयति। स वक्ति-प्राणान्तेऽपि त्वां जीवन्तं न मुञ्चामि। तद्धृदयगत-भावमजानम् मृगाङ्कः सर्वं गृहीत्वाऽस्मान्मुञ्चेति वक्ति। तथापि न मुक्तः सः। ततस्ते सर्वेऽपि चिन्तापरा जाताः किंकर्तव्यतामूढाः सन्ति। तान् सर्वान् चित्रशालायां समीपे शण्णशय्यायावयशय्यासु स्वाययति सहसाङ्कः। शेष-षण्मासैर्मण्डपिका-लेखं निर्वालितवान् राज-समक्षं परिपूर्णप्राये मण्डपिकावधौ

एकदा स्वावास-मध्ये मृगाङ्कमेकं स्व-शय्यासन्न- शय्यायां शाययति। वार्ताभिर्बह्वी रात्रिर्गता। मृगाङ्केनोक्तं-रङ्गवार्तायामस्माकं कथमपि मुञ्चिष्यथ ? स आह-हास्येन अधुना मम पाद्तल एक-सेर-घृत मवडायसि तदा मुञ्चामि। स तथा करोति परवशे पतितः। परं सेर-घृतं यदा तिष्ठत्येष निद्राण इति विमृश्य घृतं पीतं तेन रे पापिष्ठाधमाधम ? इत्युदित्वा तर्जिवः। तावत् कपट निद्रासुप्तः स उत्थाय वक्ति-अहो ! व्यवहारी रात्रौ घृतं पिबति रङ्क इव। लज्जितो मृगाङ्कः श्याममुखोऽस्थात्। ततो मध्ये गत्वौषधि-वलयं मुक्तम्। स्त्री-रूपं विधाय स्वाभरणानि परिधाय बहिरागात्। प्रोक्तं तस्य-मामुपलक्षयथाः। उपलक्षिता मृगाङ्केण पद्मावती। चमत्कृतश्चिन्तयति-किमेतत् क्षणान्तरे स पृच्छति। ततः सा पादयोः पतित्वा तं क्षामयति-मया त्वं बाढं विगोपितः खेदितश्च, त्वदुक्तं मया कृतम्। मध्ये लात्वा सर्वं दर्शितम्। लज्जितः स। वक्ति-कथं कथं कृतं ? सा यथावृत्तान्तं सर्वं प्राह। ततः सोऽपि तां क्षामयति-त्वं मया मूढेन जीवित-सन्देहे क्षिप्ता परं स्व-भाग्येनैव जीविताऽसि। एतन्मम किं कृतं त्वया परं दर्प उत्तारितः। प्रातस्तत्सुहृदस्तत्स्वरूपं ज्ञात्वा मृगाङ्कं धिक्कुर्वन्ति-एवं भाक्तिकां स्वप्रियां माया-प्रपञ्चेन निर्मानुषे द्विपे त्यजसि। ततः क्रमेण राज्ञोऽग्रे वार्ताऽभूत-देव ! माण्डपिकोऽद्य

स्त्रीरूपोऽभूत। राजा पृच्छति-इह भवे परभवे वा। ते प्राहु-इह भव एव। राजा कौतुकी तदाकारणाय स्व-मन्त्रिणं प्रेषयति। सा वक्ति-ममाऽतः परं प्राग्वदागमनं न भविष्यति। ततः स्त्रियः प्रेषिताः ताभिः सह सुखासन उपविश्य राजभवनं गता। राज्ञा पृष्टा स्वस्वरूपं मूलत आह। नृपोऽपि तद्बुद्धया चमत्कृतो [पृ-च्छति-] मम पुत्री तव दत्ता तत् कथं। सा वक्ति-तदा मम हृदये पतिरेवासीत्। एषाऽपि मम पत्ये भवतु। प्रीतिपरा मम भगिनी भविष्यति, यदि X... X... X... X... X तदा दातु। नोचेद्यथारुचि कुरु। सर्वैरुक्तम्-एष व्यवहारी धनवानस्यैव दीयतां। तस्य दत्ता सा। राज्ञा विवाहो महद्धर्या विहितो। राज्ञा तस्मै बहु दत्तमन्यदपि वरं भोजनम् स। माण्डपिकेन भार्यावचनात् षण्मासैर्मण्डपिकोत्तीर्णा, स्वपुरगम-नायोत्साहोऽभूत्। ततो वाहन-द्रव्यैरपूर्णै राजदत्तैश्च वाहनं-पूर्णी करोति। राज्ञा स्वपुत्री च पद्मावत्यपि बहु-धन-दानेन सत्कृता। स्थलमार्गेण कटकं प्रेषितं शेषं जलमार्गेण। मृगाङ्कः स्वपुरे गतो द्वाभ्यां पत्नीभ्यां सहितः सौख्यं भुङ्क्ते। स्वोपार्जितैर्धनैर्दानादि करोति। एकदा ज्ञानवद्-गुर-त्योगे स्वं-पूर्व-भवं पृच्छति मृगाङ्को। मतिसागर-गुरुराह-पूर्वभवे धन्यपु-नामनि सामान्यग्रामे वीराङ्गदो नाम क्षत्रियो दरिद्री। वीरमती भार्या। अन्यदा ग्रामान्तरे गच्छन् वटवृक्ष-वडवामीषद्रक्तवर्णां दृष्ट्वा स्वर्ण-निर्धि निश्चित्य खनन एक एव स्वर्णटङ्को लब्धःशेषा XX..XX..XX.. एवं चिन्तयति स-मेघेऽमोघधारेऽधिकं नाऽऽप्नोति बप्पीहः।

तथा गामंतराणि देसतराणि देसंतराणि विविहाणि।
हिंडंतो वि न सावइ, लच्छी तुच्छं पि निब्भायो॥ १९७

तं लात्वा गृह आगात्। तद्दिने शालि-तन्दुल-घृत-सिता-दुग्ध- मानीय परमान्नं कारितं। भोजनायोपविष्टः। तावत् कोऽपि जयदत्त ऋषिरागान् मासोपवासी। भक्त्या तस्मै परमान्नं दत्तम्। वीर-मत्यपि हृष्टाऽनुमोदयति। बहुदानेऽपत्यानां नोद्धरिष्यतीति किञ्चिच्चित्त उद्वेगं दधौ। पत्या तु चतुरेण प्रोक्तं - मोद्वेगं कुरू। अनेनर्षिणाऽऽत्म-दत्तमेव गृहीतं नाऽन्यथा न बलेन। तव बालानामपि भविष्यति। ततः कस्मान्मनसि दूयसे। ततस्तयाऽपि भावो धृतः। द्वाभ्यां मानुष-भव-सम्बन्धि-भोग-फलं कर्मार्जितं। ततो मृत्वा त्वं मृगाङ्कोऽभूद्वीरमती पद्मावती। पूर्व-भव-स्नेहेनेह भवेऽपि युवयोः प्रीतिः। दानावसरे किञ्चिन् मनसि प्रद्वेषेण समुद्रान्तर्मोचन-कुटुम्बवियोग-जलहस्त्युल्लनादि दुःखं सेहेऽनया। इत्यादि पुर्वभववृत्तान्तं श्रुत्वा द्वयोर्जाति-स्मृति-धर्मं कृत्वा स्वर्गापवर्गश्च इति मृगाङ्क-कथा।

एवं संसार-दावानल-घनावलीं श्रवण-स्पृहणीयां सुभाषितां च गुरु-देशनां श्रुत्वा तत्र राज्ञा सदयवत्स-कुमारेण च श्रावक-धर्मः प्रपन्नः। ततो वन्दित्वा गृहेषु जग्मुः सर्वे। राजा सदयस्य देशान् ददाति। स नादत्ते। अन्यदा चलन-समये राज्ञोऽग्रे वक्ति-अहं चलिष्यामि। अधुना तव पुत्र्यत्रैव तिष्ठतु। ममक्वाऽप्यवस्थाने सत्याकारणं करिष्यते। इत्युक्त्वा [मुक्ता]

लीलावती पितुर्गृहे। ततश्चलन्तं कुमारं राजा वक्ति-अश्व-रथादि-सेना-युत आडम्बरवान् व्रज।

यतः -

नादरं कुरुते कोऽपि, निर्वेषस्य जगत्-त्रये।
आडम्बराणि पूज्यन्ते, सर्वत्र न गुणा जने॥ १९८
सभायां व्यवहारेषु, शंत्रु-मध्ये जनेषु च।
आडम्बरेण पूज्यत्वं, स्त्रीषु राजकुलेषु च॥ १९९
भवेत् परिभव-स्थानं, पुमान् प्रायो निराकृतिः।
विशेषाडम्बरस्तेन, न मोच्यः सुधिया क्वचित्॥ २००
वपुर-वचन-वस्त्राणि, विद्या-विनय-वैभवाः
वकार-षट्क-हीनो-हि, नरो नार्हति गौरवम्॥ २०१

सदयः प्राह-

नायं वाग्वलासो मम चेतो हरते।
एकोऽहमसहायोऽहं, कृशोऽहमपरिच्छ्दः।
स्वप्नेऽप्येवंविधा चिन्ता, मृगेन्द्रस्य न जायते॥ २०२

तथा -

सीह सउण नवि चंदबल,नवि इच्छइ धण-ऋद्धि।
एकल्लउ गयघड भिडइ, जिहां साहस तिहां सिद्धि॥ २०३

अतो नमे सहायैः कार्यम्। ततः सावलिङ्गी-सहितश्चचाल सदयः। मार्गे गच्छन् क्वापि पुरुषाणां शब्दानशृणोत्। चिन्तितम्-क्व श्रूयन्ते रवाः। इतस्ततो विलोकयति। तावता क्वापि पर्वते प्रौढ-शिला-पिहित-द्वारा गुहा दृष्टा। शब्दानुसारेण तत्र गतः। शिला-पृष्ठतः केऽपि स्थिताः सन्ति। तत्र श्रूयन्ते रवा इति विमृश्य पाणिभ्यां शिला पृथक्कृता। ततोऽग्रे प्रौढ-सौध-समा गुहाऽस्ति। मध्ये पञ्च पुरुषाः सन्ति वार्तयन्तः। तैर्दृष्टः कुमारः सुरूपभार्यः। तैश्चिन्तितम्- शिला-मुद्रिते द्वारे कथमयं मध्य आगात्। नायं सामान्यः किं [तु] कोऽपि सल्लक्षणो राजाङ्गजो गण्यते महान्। तैः परस्परं प्रोक्तम्-यदस्य सुरसुन्दरी-समा स्त्र्यस्ति तत एनं हत्वा स्त्री गृह्यते। एकेनोक्तम्-मेवं मुधैव किं मार्यते। उपायेन स्वयं भ्रियते तत्-क्रियते। पुनस्तैरुक्तम्-एवं साधु। वयं द्यूत-व्यसनिनो विद्यासिद्धाश्चौरा ततोऽयं प्रथममाकार्यते। धूर्तावर्जनया विश्वस्तो मस्तक-पण-द्यूतेन जित्वा शिरोऽस्य गृह्यते। अस्मिन् मृते स्त्र्यात्मीयैव भविष्यति इति विमृश्य तैराकारितः। प्रीति-पोषकवाग्भिः। प्रीतो गतः स तत्रोपविष्टस्तत्पार्श्वे। तैः पृष्टं-भोः पुरुषोत्तम् त्वं कथमत्रागाः अस्माकमिदं स्थानं न कोऽपि वेत्ति। कुत आगतश्च। शिला कथं पृथक्कृता। वयं पञ्चाऽपि मिलित्वा शिलां चालयितुमशक्ताः। इत्युक्ते कुमारो वक्ति-अहं। दुर-देशादागतो भवतां शब्दान् श्रुत्वा कौतुकादत्रगच्छम्।

शिला-पृथक्करणे तु किं दुष्करं पौरुषवताम् । ते पञ्चाऽपि चमत्कृताः कथयन्ति- वरमागतोः । अत्रोपविश । कौतुकं क्रियते । उपविष्टः स । तैरुक्तम्-द्युत-रमणं वेत्सि कुमार ओमिति वक्ति । तैरुक्तम्-रम्यते । स आह-वरं । परं मम पार्श्वे पण-मोचनार्हं नास्ति । तैरुक्तम् सर्वेषां मस्तकमेव पणोऽस्तु । कुमारेण चिन्तितमेते कौटिल्येनैवं वदन्ति । यतः -

आकारैरिङ्गितैर्गत्या, चेष्टया भाषणेन च ।
नेत्र-वक्त्-विकारेश्च, लक्ष्यतेऽन्तर्गतं मनः ॥ २०४

कौटिल्यं त्वेतेषां मस्तकेष्वेव पतिष्यतीति कुमारः प्राह-एवं भवतु । ततो द्यूतेन हरसिद्धि-प्रभावात् पञ्चानामपि शिरांसि जितानि । तैरुक्तम्-गृहाणास्माकं शिरांसि । ततः कुमारो वक्ति - भोः प्रायो मित्रैर्भ्रातृ-बन्धु-वर्गैः सह प्रीत्या रम्यते । तेन युयं मम भ्रातृतुल्याः ।

यतः -

सहोदर सहाध्यायी, मित्रं वा रोग-वालकः ।
मार्गे वाचा कृत-प्रीतिः, पञ्चैते भ्रातरः स्मृताः ॥ २०५

तेन भवतां शिरांसि कथं छिनद्मि । तेन हृष्टा जीवितदानेन वदन्ति-भो अद्य-प्रभृति यज्जीव्यते स तवैव प्रसादो । वयं तव किङ्कराः । त्वं स्वाम्यस्माकम् । वयं तु तव द्रोहं चिकीर्षवः पापिनोः । द्रोहोऽस्माकमेवोपरि पपात ।

यतः -

द्रुह्यन्ति ये महात्मभ्यो, द्रुह्यन्त्यात्मानमेव ते ।
सूर्येन्दुग्रह-द्रुग्-हुः, शीर्ष-शेषोऽभवन् न किम् ॥ २०६

तथा -

सौम्ये विरूप-चिन्तायामपि स्वस्य विपद्ध्रुवः ।
दधि-मन्थचिकीर्मन्थः स्त्रीभिर्बद्धो निरीक्ष्यताम् ॥ २०७

कुमारः पृच्छति-कथं ममोपरि द्रोहश्चिन्तितः । तैः सत्यमेव स्व-चिकीर्षित-कृत्य मुक्तम् परमस्माकमेव तदभूत् । तव रक्षा दैवेन कृता यतः -

बप्पईडा ! वड भूस्तरुं (?) किम राखिसि अप्पाण ? ।
तलि आहेडी संचरइ, झय(?)सिरि भमइ सींचाण ॥ २०८

आहेडी सरपिइ डसिउ, सर लागु सींचाण ।
बापईउ उडी गयउ, इम राखिउ अप्पाण ॥ २०९

कुमारः पुनः प्राह-के यूयं किमत्र गुप्तास्तिष्ठथ ते प्रोचुर-वयं चौरा विद्या-सिद्धाः। अजक-आमय-मूली-सेवाल-घोराधरा-कारनामानो वयं पञ्चैवाऽत्रस्थाश्चौर्येण धनमाहृत्य विलसामः। ततः सदयश्चलति। तैरुक्तम्-हे सत्पुरुष गृहाण किमपि। स न गृह्णाति। तावत् तुष्टैनैकेनादृष्टं पद्मिनी-पत्र-वेष्टित एकः कंचुको-लक्ष-मूल्य-रत्न-मौक्तिक-खचितः फलक-खोलीआ-मध्ये क्षिप्तः। कुमारो न वेत्ति। निःसृतः सभार्यः सः। तैः प्रोक्तम्-तव किञ्चित् कार्यं महत् कष्टं वा पतति तदा - अञ्जनसिद्धि-रससिद्धि-युद्धबुद्धि-जलतारिणी-गिरिविदारिणी-वैरिदमिनी-तालो-द्घाटिन्या काशगामिन्यादि बहु विद्यावतोऽस्मान् स्मरेः यतस्त्वमस्माकं परम मित्रम्।

क्षीरेणात्मगतोदकाय स्व-गुणा दत्ताः पुरा तेऽखिलाः।
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः।

गन्तुं पावकमुन्मतेस्तदभव दृष्ट्वा तु मित्रा पदं,
युक्तं तेन जलेन शाम्यति पुनर्मैत्री पुनस्त्वी दृशी आरम्भगुर्वी ॥२१०

कुमारेणोक्तोमिति। चलितश्चाग्रे एकं शून्यं पुरं ददर्श। मध्ये गतश्चतुष्पथे हट्ट-श्रेणिं धन-धान्य-सम्भृतां दृष्ट्वा चिन्तयति-यदि कोऽपि मिलति तदा निर्मानुषं पुरस्वरूपं पृच्छ्यते। परं न पश्यति नरं कमपि। ततो राज-भवनं गतः। सन्ध्यासमये षष्ठभूमौ स्थितस्तत्र। रात्रौ पत्नी निद्रां गता। कुमारो जागर्ति। इतश्च मध्यरात्रौ समीप-वासे काऽपि स्त्री करुणस्वरेण रोदिति। तत्स्वरूप-ज्ञानाय तत्र गतः स। तथा दृष्ट्वा पृष्टा सा-किं रोदिषि। का त्वमत्र पुरे। सा वक्ति - नाहं यस्य तस्याग्रे रहस्यं वच्मि। त्वं तु भाग्याधिकस्तेन तवाग्रे कथयामि। परमधुना रात्रिः। रात्रौ तु रहस्यं भाग्यवतोऽप्यग्रे न वाच्यं यतो नीतिशास्त्र उक्तं -

दिवा निरीक्ष्य वक्तव्यं, रात्रौ नैव च नैव च।
संञ्चरन्ति महाधूर्ता, वटें वर रुचिर्यथा॥ २११

कुमारेणोक्तं कथमेतत्। सा प्राह-उज्जयिनीपुर्यां विक्रमार्कस्य राजसभा-शृङ्गार-भः पंच-शत-पण्डित-मुख्यो वररुचि-नामा-पण्डितश्चतुर्दश विद्या पात्रम्। अन्यदा राज्ञा स्व-क्रीडा-शुको विदग्ध-मुखमण्डन-नामोऽन्यराज्ञः पार्श्वेलेखं दत्त्वा प्रेषितो गगनाध्वना कृतकार्यः पश्चाद्वलमानः पद्मिनी पुरे कस्यापि प्रौढेभ्य-गृहवेदिका-भित्ति-भागे विशश्राम। तत्र रम्भाकारं कन्या-वृन्दं व्यलोकयत सः। तन्मध्य। एकया प्रोक्तम्-अयंशुकः श्रीविक्रमनृपस्य जीवितादपि वल्लभो विदग्धमण्डनोऽधीती नामतश्च। ततस्तद्वयस्याभिः पृष्टम्-कथं वेत्सि। साऽऽह उज्जयिन्यां मातुलस्य गृहस्थया प्राग्दृष्टः। अत्र मम पितृगृहमवन्त्यां मातुः पितृगृहं। सा हृष्टा वक्ति-अहो शुकराज आगच्छ ममोत्सङ्गमलङ्कुरु। तत उड्डीय तदुत्सङ्ग उपविष्टः। सा संवाहनां करोति तस्य कुशलप्रश्नपूर्वकं-अहं तव दर्शनात् सनाथैव जीविता।

यतः -

पाइअ कव्वं सुविलास-कामिणी सुअण-संगमो गीअं ।
एयं रयण  चउक्कं , संसारे निम्मियं विहिणा ॥ २१२

उवयारह उवयारडउ, सव्वउ लोलु करेइ ।
गुणि अणकीधइ गुण करइ, विरला, जणणि जणेइ ॥ २१३

अथ त्वं मम भाग्येन दृष्टिगोचरे गतस्तदा विक्रमराज्ञे मदीयमेकं श्लोकं कथय प्रसादं कृत्वा । यदि न कथयिष्यसि तदा स्त्री-हत्या-प्रातकं तव । शुक आह-तत् कथय् । सा श्लोकं लिखित्वाऽर्पयति -

पद्मं तुला रदौ रक्तो तिलकं मञ्जरीयुतम् ।
मुखे दशाङ्गुली-क्षेपः कथमेतत् वयाऽनघ ॥ २१४

एतत् समस्या-श्लोकं तयाऽर्पितं तद्वाचिकं चाङ्गी-कृत्य कीरोऽगात् । तयाऽर्पितः श्लोकस्तेन राज्ञा पण्डित-पार्श्वे तदर्थः पृष्टः । इतश्च तत्रैवोज्जयिन्यामहि-राजश्रेष्ठी । तत्पुत्रो धनार्जनाय बहु-हेम-टङ्कान् गृहीत्वाऽश्वारूढ एक-क्षत्रिय-जन-साहाय्यो देशान्तरे चचाल । मार्गे धन लोभात् साहाय्येनैव मारणाय स बद्धः । तेन व्यवहारिपुत्रेणोक्तं धनं गृहीत्वा मां मुञ्च । इत्युक्तोऽपि न मुञ्चति तं स दुष्टः । ततो मृत्यु-निश्चयं ज्ञात्वा बुद्धिमता तेन स्व-वैर-वालनाय पितुर्धनार्पणाय चैका सन्देशरूपा हृदयालिका प्रोक्ता तदग्रे-मम पितुरेकं सन्देशं वदेः । अप्रसिख इति । तेनाचिन्ति-एतत् कथनेन मम को दोषः । ततस्तेनाङ्गीकृतम् । कियता कालेन ततः स्वपुरमागात् । तत्पित्राद्याङ्ग मान्द्यादिना तत्पुत्रमरणमुक्तम् । 'अप्रसिख' इति सन्देश उक्तोऽस्ति । तदर्थं तु न कोऽपि पर्यवस्यति । स श्रेष्ठी राज्ञः पुरो गत्वा तां चतुरक्षरां हृदयालिकां वदति, तदर्थं राजा पञ्च-शत-पण्डित-पार्श्वात् पृच्छति । ते नामापि न विदन्ति । बहूनि दिनानि गतानि परं कोऽपि हियालिया द्वयस्यार्थं न वेत्ति । वररुचि-पार्श्वं मिलित्वा सर्वैर्विचारः कृतो दिन-त्रयं च मार्गितम् । ततो विचारं कुर्वतां तेषां दिन-द्वयं गतम् । विषण्णाश्चिन्तयन्ति - कथं ज्ञायतेऽर्थः । तृतीयं दिनमगमत् । परमर्थो न ज्ञातः ।

यतः -

प्रहेलिकां समस्यां च, निधानं हृदयालिकाम् ।
गर्भोत्पत्तिं विपत्तिं च, नैव जानन्ति मानवाः ॥ २१५

कदाऽपि ज्ञानयोगेन, देवतानां प्रसादतः ।
जानन्ति मानवा नूनं, दैवतांशा भवन्ति ते ॥ २१६

प्रभाते देश-निष्कासनं भावीति दिनान्ते निर्गच्छन्ति भयातुराः-पण्डिता वर रुचि

प्रभृतयः । प्रेत-वने वट-कोटरे स्थिता रात्रौ । तत्र भूता बहवो वसन्ति । विनोदं कुर्वन्ति । एकेनोक्तम्-कल्ये पंच-शत-पण्डितानां निष्कासनं विडम्बनं भविष्यति । लघुः पृच्छति-केन हेतुना । वृद्धो वक्ति-शुकोक्तं श्लोकं चतुर-क्षरां हृदयालिकां च न बुध्यन्ते ग्रासं तु भक्षयन्ति । लघुः पृच्छति तस्य कोऽर्थोः । वृद्धः प्राह- न कथयामि ।

बालनारी नरेन्द्राणां, ग्रहो ग्रथिलसन्निभः । २१७
कङ्क सी-कृते बलभी-भंङ्गः । सीतया हेममृगाग्रहे रावणसङ्गरोः ॥

राज्ञो ग्रहे दुर्योधन मारणम् । ततो वृद्धो वक्ति-शृणु । 'पद्मं तुला रदौ रक्तौ पद्मपुरं' तत्र तुला वणिकपुत्री तिलकमञ्जरी नाम नृपविक्रमेऽनुरक्ता विज्ञपयति तव रदावुर्ध्वाधोरूपौ रक्तौ ममोष्ठौ दशतः पाणिग्रहणानन्तरं चुम्बत इति भावः । मुखेन दत्ताङ्गुलीक्षेपो दीनत्वं ज्ञापयति मां परिणयेति । तं श्लोकार्थं वररुचिः शुश्राव । चतुरक्षराणां चार्थो यथा -

अनेन तव पुत्रस्य प्रसुप्तस्य वनान्तरे ।
शिखामाक्रम्य पादेन, खड्गेन कृन्तितं शिरः ॥ २१८

इति श्लोकं च श्रुत्वा वररुचिर्हर्षोत्कर्षादुल्लसद्गात्रो वर-कोटरान्निर्गत्य गृहे गतः । तावता पण्डित-धरणाय पुरुषा भ्रमन्ति । केऽपि धृताः । ततो वररुचिः प्रोचे-किं ध्रियन्ते पण्डिताः ।

राज्ञः प्रश्नोत्तरमहं दास्ये । तूर्यं ते नष्टाः शृगालाः । कियद् यास्यन्ति । राज्ञा तत्र पुरे गत्वा व्यवहारि-सुता तिलक मञ्जरी विवाहिता । श्रेष्ठिना पुत्र-सत्कं धनं गृहीत्वा स निगृहीतः । ततो लघु-भूतेन वृद्ध भूत-पार्श्वे पृष्टम्-तात पण्डित-निष्कासनं तवोक्तं नाभूत् तत् किं कारणं-अवधि-ज्ञान तो वररुचि-पण्डितस्य वट-कोटरावस्थानं ज्ञातमर्थसङ्गतिर्मदुक्ता तेन श्रुता । तेन पण्डितानां मानं चाऽजनि । तत्स्वरूपं लघोरग्रे प्रोक्तम् ।

तत उक्तम्-दिवा निरीक्ष्य वक्तव्यमिति । सदयोऽवगेव-एवं सत्यपि ममोत्सुकस्य कथय । ततः सा वक्ति-तदा शृणु-अहं लक्ष्मीर्नन्दराज्ञो निर्नाथत्वेन रोदिमि । मम त्वं नाथो भव ।

सदयो वदति -भविष्यामि । लक्ष्मीमागच्छन्तीं कः पादौर्निलोठ-यति । पुनस्तां पृच्छति-इदं पुरं शून्यं केन हेतुना । सा वक्ति-भोःकुमार शृणु । यदि कौतुकम् । अत्र वीरपुरे नगरे भीमसेनो नृपो लक्ष्मी राज्ञी रूप-सौभाग्यादि-निर्जित-रम्भा । इतश्च कोऽपि तपस्व्यत्र समागात् लोकरञ्जनाय । स्त्री-मुखं नाऽवलोकते । मास-क्षपण-पारणे पारणाय लोका निमन्त्रयन्ति । कम्बाधरैर्न रैराश्रयात् स्त्रियोऽपसार्यन्ते । एवं स्त्री-विडम्बनां श्रुत्वा काऽपि वेश्या-अहो ! कपट -पाटवं मूर्ख-लोक-रञ्जन-विषये कियान् दम्भ इति मन्यमाना तद्बोधनाय भक्तानां गृहे पारणाय गच्छन् दृष्टः । तया तावता वेत्रिभिर्वार्यमाणाऽपि नापसरत् सा । पार्श्व आगत्य तापसमस्तके

टुम्बकमदात् । रुष्टस्तापसो विष्णुरिति जल्पन् स्नानार्थं पश्चाद्वलितो वेश्याया दर्शने स्नानमिति कृत्वा । राज्ञा ज्ञातम् । साऽऽकारिता पृष्टं च । तत्तापसं पार्श्वे कृत्वा प्रोचे-

आंखिइ मीचि म मीचि मन, नयणि निहाली जोइ ।
अणु अप्पिहिं जोइंइ, अव नर बीजउ कोइ ॥ २१९

तया राज्ञे ज्ञापितं तद्दम्भ-स्वरूपम् । राज्ञा तत्स्वरूपज्ञानाय स्वगृहे पारणाय निमन्त्रितो । बहु-भक्ष्य-भोज्यै भोजयति । राजा ज्ञया राज्यग्रे स्थिता तालवृन्तेन वात-प्रेक्षपं करोति । तावत् तद्रूप मोहितः कामयन तच्छूकेन दृष्टः ।

यतः -

नामापि स्त्रीति संदि विकरोत्येव मानवम् ।
किं पुनर्दर्शनं तस्या, विलासोल्लासित भ्रुवः ॥ २२०

उत्थितो राज्ञीं प्रार्थयति । चलनादि करोति । ततो राज्ञी रुष्टा ब्रूते-रे तापस सद्यो याहि। मुखं मा दर्शय । तथाऽपि काम-मदोन्मत्तो न विरमति ।

यतः -

तावन् महत्त्व-पाण्डित्यं, कुलीनत्वं विवेकिता ।
यावज्ज्वलति नाङ्गेषु, हन्त पञ्चेषु-पावकः ॥ २२१

सिक्तोऽप्यम्बुधस्त्रातैः, प्लावितोऽप्यम्बु-राशिभिः ।
न शान्ति यात्यहो चित्रं, काम-वह्निः प्रयत्न तः ॥ २२२

तावद्राज्ञी बुम्बाखं चकार । तज्ज्ञात्वा राजा तत्रागात् ।
अपराध-सहस्त्रेऽपि, योषिद्-द्विज-तप-पस्विषु ।
न वधो नाङ्ग-विच्छेदो देश-निर्वासनं वरम् ॥ २२३

इति जानन्नपि राजा रुष्टो विडम्ब्य तं जघान । स मृत्वा राक्षसो बभूव । पूर्व-भव-वैरं स्मरन् राजानं तं सावविडम्बनया हन्ति । रे रण्डे मम मारणाय त्वं पूत्करोषि(इति) । राज्ञीमपि हन्ति । रोषेण नगरं शून्यं चक्रे सः । यो वासयति तस्याऽप्युद्वेगं करोति । तेन हेतुना शून्यमिदं पुरम् । अस्य शून्यत्वे स्त्र्येव हेतुः ।

यतः -

अकीर्तेः कारणं योषिद्, योषिद् वैरस्य, कारणम् ।
संसार-कारणं योषिद, योषितं वर्जयेत् ततः ॥ २२४

इत्युक्त्वा लक्ष्मीस्तिरोऽभूत् । तच्छ्रुत्वा कुमारश्चिन्तयति-

ये राम-रावणादीनां, सङ्ग्राम-ग्रस्त-मानवाः ।
श्रूयन्ते स्त्री-निमित्तेन, तेषु कामो निबन्धनम् ॥ २२५

तदा शून्य-नगर-करणे का वार्ता। परमहं सिद्धि देवी-प्रभावेणै-तद्दैवतं सन्तोष्यस्यानुमतिं च प्राप्य वासयिष्यामि । इति स्वरूपं ज्ञात्वा पत्नी-स्थाने पश्चाद्गतश्चिन्तयति-

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।
निर्धना पृथिवी नास्ति, भाग्यमेकं हि चेद्भवेत् ॥ २२६

तथा -

निरीहस्य निधानानि, प्रकाशयति मेदिनी ।
अङ्गोपाङ्गानि डिम्भानां, न गोपयति कामिनी ॥ २२७

ततः कियती-वेलानन्तरं वासितं ताम्रचूडैः । प्रकटीभूतो रवि-रथ-सारथिर। विंकसितानिं कमलानि । प्रभाते जाते ततो निद्राणः ।

तथा-

कारणं विना पुण्य वतां नृणां हरिप्रिया ।
समायाति स्वयं याति पाद्मभाजां निजालयात ॥ २२८

प्रभात उत्थाय तत्स्थाने गत्वा विलोकयति । तावत्तामसंख्यातां लक्ष्मीं । दृष्ट्वा पत्नी प्राह-अधुना बलि-पूजादि-विधानं विना न गृह्यते। अवसर आगत्य बलि-विधान-पूर्वं ग्रहीष्यामि ।

यतः

अत्वरा सर्व-कार्येषु, त्वरा कार्य-विनाशिनी ।
त्वरमाणेन मूर्खेण, मयूरो वायसीकृतः ॥ २२९

केनचिद्दरिद्रेण यक्ष आराधितो । यक्षस्तुष्टः । पुंसा धनं याचितम् । यक्षेणोक्तम् तव भाग्यं नास्ति । स उवाच तथाऽपि मे देहि । यक्ष आह-तर्हि मद्भवने मयूरो नृत्यं करोति । एकं पिच्छं क्षेरये । तत् त्वया ग्राह्यं । कियता कालेन धनवान जातः ततः कलपकान्येकत्र मेलयित्वा भारकः कृतः । ततोऽतिलोभेन कालक्षेप-मसहिष्णुतया मयूर एव धृतः । ततो रुष्टो यक्षः । स वायसः कृतः । अग्रेतनपिच्छान्यपि काकपिच्छान्येव चाभूवन् । इति कृत्वा न किमपि धनं जग्राह स नाऽऽकुलितचित्तः ।

यतः

इत्थीइ जणइ चित्तं, न चलइ कइआ वि नेव इत्थीए ।
पुरिसेसु ताण रेहा, दिज्जइ सुविणे वि धीराणं ॥ २३०

ततोऽग्रे चलितः सन् चिन्तयति ।

यतः -

नगर-शतं गन्तव्यं, विज्ञान-शतानि शिक्षणीयानि ।
भूपति-शतं च सेव्यं, स्थानान्तरितानि भाग्यानि ॥ २३१

इत्येतत् सत्यमेव । यद्वा -

लच्छी न विण्हु-पासे, नवि रवीराए न चेव कामवणे ।
वर-पुत्र-पायवे सुपुरिसाण लच्छी सया वसइ ॥ २३२

कौतुकानि विलोकयन् पञ्च-दिन-प्रायान्ते पुरमेकं प्राप्य केनापि ग्रामाधिपेन भट्टेन दृष्टः सुरूपः सुन्दरभार्यः । पृष्टं-क्व यास्यथ । कुमारेणोक्तं प्रतिष्ठानपुरे गमिष्यामि । भट्टः प्राह-उत्सुरे यास्यथ । सन्ध्यासमयः प्रदोष उच्यते । द्विधाऽपि, आचारेणाऽऽकृत्या कुलगुणादि ज्ञात्वा उत्तमोऽसौकोऽपीतिं तस्य वासायाग्रहं करोति भट्टः । कुमारेण चिन्तितम्-अग्रे क्वाऽपि स्थातव्यम् । अयं तु भट्टो ग्रामणीराग्रहेण स्थापयन्नस्ति इतिविचार्य स्थितस्तत्र सः ।

यतः -

नयरं होइ अट्टालएहिं पायार-तुंग-सिहरेहिं ।
गामं पि होइ नयरं, जत्थ छइल्लो जणो वसइ ॥ २३३

तत्सार्धं गृहे गतः । तेन सद्भक्त्याऽऽवर्जितो मर्दन-स्नान भोजनादिभिः । रात्रौ शय्या-हंसतूलिकोच्छीर्षक-पत्रताम्बूल-प्रदानादिभिश्च सत्कृतः ।

यतः -

श्रान्तस्य यानं तृषितस्य पानं, भुक्तं क्षुधार्तस्य भयस्य रक्षा ।
एतानि यस्योपनयन्ति काले, तन लक्षणज्ञां प्रवदन्ति धन्यम् ॥ २३४

तथा च -

दद्यात् सौम्यां दृशं वाचमभ्युत्थान मथासनम् ।
शक्त्या भोजन-ताम्बूले, शत्रावपि गृहागते ॥ २३५

किं पुनस्तादृशे सत्पुरुषे । कुमारः-सावलिङ्गी प्राह-प्रिये पश्यास्य भट्टस्य सौजन्य-गुणम् । साऽप्याह- देव सज्जना एवं विध-गुणा एव सन्ति । यतः -

तृणानि भूमिरुदकं, वाक् चतुर्थी च प्रीतिदा ।
सतामतो निरोहेषु नोच्छिद्यन्ते कदाचन ॥ २३६

पुनः प्राह कुमार-पञ्च-क्रोशैरितः प्रतिष्ठानपुरं समस्ति । प्रातस्त्वां निःश्रीकां पादचारेण कथं त्वत् पितृ-गृहे नेष्यामि । त्वां वस्त्राभरणरहितां । तत्र नयतो मम नीरमुत्तरति । तेन प्रतिष्ठान-पुरे गत्वा त्वत्कृते वाहन-पट्टकूलाभरणाद्यानयामि । पञ्च दिनानि लगिष्यन्ति प्रौढे तत्र पुरे । तावत्त्वमत्र तिष्ठ। तच्छ्रुत्वा सा प्राह - नाथ तव हृदयं वज्रमयं समस्ति । किं यन्मामत्र मुक्त्वा यास्यसि । अहं क्षणमपि तव विरहे न जीवामि पञ्चदिन्याः का वार्ता । देव नारी पतिं देववत् पूजयति । तत्कृते स्वपाणानपि त्यजति । तथाऽपि नरस्य सा रोचतेऽथवा न रोचते । तस्या विरह-दुःखं मनस्यपि नानयति । प्रायः स्वेच्छयाऽन्यत्र मनो रमयति । ततः सदयो ब्रूते-प्रिये नर-ब्रुवस्यैवैतल्लक्षणं नोत्तमनरस्य ।

यतः

स्वाधीनेऽपि कलत्रे,नीचः पर-दार-लम्पटो भवति ।
परिपूर्णेऽपि तडागे, काकः कुम्भोदकं पिबति ॥ २३७

उत्तमो यदि योजन-शतानि व्रजति तथाऽपि स्वप्रियां हृदयान् न विस्मारयति ।

यतः -

निय-महिला-मुह-कमलं, पुत्त-मुहं धूलि-धूसर-च्छायं ।
सामि-मुहं सुपसन्नं, जोयण-सयये न वीसरइ ॥ २३८

यत्र सा भवति तत्रैवागच्छति । सारंवस्तु मौक्तिक स्वर्णादि सर्वं प्रिया-कर एवाऽर्पयति । स्व-मातृ-भ्रातृ-पुत्रादिषु परेषु न विश्वसिति । तैश्च सह कलिं करोति । ममाऽपि तव विरहो बाधते । परं पञ्चमदिने वाचा-बद्ध आगमिष्यामि । इत्यादिकैर्वचोभिः पर्यवसापिताऽपि ब्रूते -

जइ वच्चसि वच्चतुमं, को वारइ तुज्झ नाह जंतस्स ।
तुह-गमणे मह मरणं, लिहियं होही कयंतस्स ।। २३९

सदयः शपथ-शतैः पर्यवसापयति । ततः साऽऽह-पञ्चम-दिने प्रहर-द्वयं यावन् मार्गं विलोकयिष्ये । ततः परं काष्ठानि । इति पणं विधाय मुक्तः । पुनः सावलिङ्गी प्रोचे-देव तत्र पुरेऽनेक द्यूतकार-धुत्तारक-चौर-ग्रन्थिच्छेटक-बक-कायस्थादिका वञ्चका बहवो वसन्ति । अतस्तत्पुरं विषमं चतुःषष्टि-योगिनीनां क्रीडा-पुरं द्विपञ्चाशद्-बीराणां निवास-स्थानम् । लोका अपि स्व-स्व-संज्ञाभिर्व्यवहार-क्रियां कुर्वन्ति । बहु-बुद्धि-सनाथोऽपि मुह्यतेऽत्र । सैव वक्ति लोकोक्तिस्त्वेवं-

एक टक्क तिहां रात रहेवि, दुन्नि टक्क तिहां रह न करेवि ।
तिन्नि टक्क तिहां जम का धरणा च्यारि टक्क तिहां निश्चिइ मरणा ।। २४०

कायस्थेनोदरस्थेन, मातुर्मांसं न भक्षितम् ।
मा दयां तत्र जानीहि, तत्र हेतुरदन्तता ॥ २४१

लेखिनी-कृत-कर्णस्य, कायस्थस्य न विश्वसेत् ।
यमोऽपि वञ्चितो येन, गकारान्तर-रेखया ॥ २४२

तथा च नाथ विश्वासो न कस्याऽपि विधीयते । तथा चोक्तं विवेकविलासे -

विश्वासो नैव कस्यापि, कार्य एषां विशेषतः ।
पाखण्डिनां तथा क्रूर-सत्त्व-प्रत्यन्त-वासिनाम् ॥ २४३

धूर्त्तानां प्राङ्निरुद्धानां, बालानां योषितां तथा ।
स्वर्णकार-जलाग्नीनां प्रभूणां कूट-भाषिणाम् ॥ २४४

नीचानामलसानां च पराक्रमवतां तथा ।
कृतघ्नानां च चौराणां, नास्तिकानां च जातुचित् ॥ २४५

इत्यादिशिक्षामुदित्वा स्थितायां भार्यायां सदयः प्राह- ही नखिनां प्रभुणामपि ममैवंविधमेव विलोक्यते ! अहं कूटेष्वास्फालकः । एवं विधे पुरे मेऽतिलाभे । यद्यकथयिष्यः, तत्पुरं साधुलोकमेव तदा ममकुतो लाभः । ततो भट्टमाकार्य सदयेनोक्तम्-भो भट्ट अहं स्वभार्यां तव गृहे मुक्त्वा प्रतिष्ठानपुरे यामि पञ्च दिनानि । सारा करणीया । स आह मुञ्चात्र निश्चिन्तीभूय । तदा पत्नी प्रोचे-अहमेकाकिनी कथं भट्टगृहे स्थास्यामि ।

यतः

पुस्तिका खटिका नारी, परहस्ते गता सती ।
नष्टा ज्ञेयाऽथवा पुंसा, घृष्टा भुक्ता च लभ्यते ॥ २४६

सदयो ब्रूते भट्ट-समक्षम्-क्षत्रिया भट्टा राजपुत्राणां बान्धवा इति लोकोक्तिर्यतो ये राजपुत्राः सङ्ग्राम-पतितास्तेषामग्नि-प्रदाता । तत्सम्बन्धी कोऽपि न स्यात्तदा तत्र तेषां भट्टाः सम्बन्धिन इति । एते च लोक-विहित प्रौढ-करणीयोन्नति-कारका वीराणां शूर-सभासु वीरचर्याप्रकटनेन यशःस्फाति कराः । तेन त्वामात्म-बान्धव-गृहे मुक्त्वा व्रजन्नस्मि । इत्यादि युवक्त्या पर्यवसाप्य तां तत्र मुक्त्वा स चलिता । गतः पुरासन्न-तटा के जलपानार्थम् । तावता जलहारिण्यो बह्वयः समासन-तटे जलं भरन्ति । एकया पृष्टम्-एष जलं पिबति किं कारणं । परयोक्तम्-भवत्यत्रत्याप्येतन् न जानाति । यत एष आगच्छन् स्वस्त्रीं रुदन्ती वारितवान् । हस्ताभ्यां-सकज्जल नयनाश्रु-पातं लुञ्छितवान् । तदा कज्जलादिलौ स्वहस्तौ स्नेहवशान् नायं धौतंवान एतेन हेतुना ज्ञायते यदस्य नरस्य स्व-स्त्री विषये महास्नेहोऽस्ति । तत् कुमारेण श्रुतम् चिन्तितम्-अहो विलोक्यतां स्त्रीणां चातुर्यम् । ततः पुरं प्रविशतोऽस्यैक घुण्टकञ्छिन्नभक्तः(नर-

कः?) सम्मुखोऽभूत । कुमारेणाचिन्ति-प्रथम-कवले मक्षिका-पात इतिवत् प्रथम-प्रवेशेऽपशकुनः । पश्चाद् वलितो विनायक-देवगृहं गत्वोपविष्टः । तावता टुण्टेन चिन्तितम् धिङ्ममे कुरूपं । लोकानामपशकुनहेतुः । अस्य कथमपि शकुनं कुर्वे । ततः स पुष्प-फल-पत्र-पूग-खाद्यादि-बहु-वस्तुभिश्छब्बां भृत्वा सम्मुखो जगाम । अग्रे मुक्त्वा प्रोक्तम्-भोः सत्पुरुष तव शकुनकृत एतदानीतं मया । वन्दस्व शकुनम् गृहाणेदम् । कुमारेण चिन्तितम् कोऽप्येष चतुरो महापुरुष आचारेणास्य कुलं महल्लक्ष्यते, येन प्रागनुपलक्षित-स्यर्णिपि मम हितकाम्पया शकुन-माङ्गल्य करणायैवं भक्ति-प्रति-पत्तिं विदधाति । यद्वा -

पद्माकरं दिनकरो विकचं करोति, चन्द्रो विकाशयति कैरव-चक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति, सन्तः स्वयं पर हितेषु कृताभियोगाः ॥२४७

टुण्टकोऽपि चिन्तयति-यद्येष महाकुलप्रभूतोऽस्ति तदा राज-योग्य-वस्तुषु पाणिः क्षेप्स्य त्य[न्य]था खाद्य-वस्तुषु, इतरलोकानां पर्वस्वेव (?) सद्भावा त्तेषां वस्तूनाम इति चिन्तयति तस्मिन् पुंसि कुमारः पुष्प-पूग-पत्राण्यग्रहीत् राजायोग्य त्वात् । महान्तः कस्याऽप्यभ्यर्थनां न विफलां कुर्वन्तीति । शेषं तु शकुन-हेतु वन्दित्वा पश्चादर्पितं तस्यैव । ततोऽनेन परीक्षितम्-महा-भूपति-कुलादि-भवोऽसौ । नादृष्टकल्याणोः कुल (?) । कुमारेण पृष्टम्-भोस्तव सुख-मस्ति । स आह-सत्पुरुष किं सुखं पृच्छसि, यतोऽहं सिंहलद्वीपाधिपतिराज्ञः सुतः सुरसुन्दरनामा । इदं पुरं । बहु-कौतुकोपेतं योगिनी-वीरादीनां स्थानमित्यादि श्रुत्वा विलोकनोत्कण्ठितः पञ्च-शत-हस्ति-स्वर्ण-कोटि-युतोऽत्रागाम् । द्यूतकारैः कपटेन सर्वं गृहीतं शस्त्राणि हस्तनासादि च । अत्र द्यूतकारैः कपट नाटक-सूत्रधारैः सर्वोऽपि मुष्यत आगन्तुकादिजनो महाधूर्तोऽपि ।

यतः-

तृणच्छन्नैर्महाकूपैर्मधुलिप्तैर्महासिभिः ।
कितवैश्च मुखे सौम्यैर्दुर्दशां को न नीयते ॥ २४८

तेन मम किं सुखं पृच्छसि ।

यतः -

नह घट्टा कर पंडुरा, सज्जण दूरी हूअ ।
सूना देउल सेवीइ, तुज्झ पसाइ जूअ ॥ २४९

द्यूतेन धनमिच्छन्ति, मानमिच्छन्ति सेवया ।
भिक्षया भोगमिच्छन्ति, ते दैवेन विडम्बिताः ॥ २५०

जूअ [रमेविण] जं धण-आसा, वेसा-मेहुणि जं कुल-आसा ।
सिर मुंडेविणु जं रूवासा, तिन्नि वि आसा खासा पासा ॥ २५१

अहो भद्र ! अतः परमहं व्यङ्गितदेहः पश्चाद्वन्तुं नोत्सहे । तच्छ्रुत्वा कुमारो ब्रूते-मम द्यूतकारा एव विलोक्यन्ते । ये तु द्यूतरसं न विदन्ति तत्र कुशलेनाऽपि न भवन्ति, तेषां त्वदुक्तगुणमेवैतत् परं ममा भिष्ट-प्रदम् । यतो नाममात्रं भोजनं सविकारं, भूषणमभिमान-मात्रसुखं स्त्री सुखमविश्वास-विरसं, गीत-नृत्यादित्रयं पराधीनं । अध्यात्मसुखत्वं साध्यते न । संसारे सारं द्यूत-सुखं । यतोऽस्य लय-सुखं योगिनोऽपिप्रार्थयन्ति ।

यद् दाये द्यूतकारस्य, यत्पियायां वियोगिनः ।
यद् राधा-वेधिनो लक्ष्ये, तद् ध्यानं मे त्वयि प्रभो ।। २५२

एतदाकर्ण्य सुरसुन्दरेण चिन्तितम् -

अज्ञानं खलु कष्टं, क्रोधादिभ्योऽपि सर्व-पापेभ्यः ।
अर्थं हितमहितं वा, न वेत्ति येनादृतो लोकः ।। २५३

पुनरुक्तं तेन-भोः सत्पुरुष, अहं तव हितं वच्मि । मां दृष्ट्वा कोऽपि द्यूतासक्तो मा भूयात ।

यो द्यूत-धातुवादादि-सम्बन्धैर्धनमीहते ।
स मषी-कूर्चकैर्धाम, धवलीकर्तुमिच्छति ।। २५४

वृद्धानां वाक्यं -

देवज रूठउ काइं करइ, किमु चपेटा देइ ।
कइ वेसाहरि पाठवइ, कइं रमाडइ जूअ(?इ) ।। २५५

सदयोऽवक्-सर्वं वर्यं भविष्यति । टुण्टः प्राह-तव द्यूतकारैः प्रयोजनम्-खङ्गं विना तव पार्श्वे पश्चात् स्वामिन न किमपि । कुमारः प्रोचे-विलोकयंस्तिष्ठ कौतुकम् । इत्यादि-संवादात् प्रीतिर्मिलिता द्वयोरपि । तत उत्थाय पुरान्तर्गतावेकत्र सूर्यप्रासादे जन-मेलापक-कलकलं शृणुतस्तौ । सदयः पृच्छति-कोऽयं जन-कलकलः । स प्राह निःस्वादोऽयं कलकलोऽभीक्ष्यते पानीयरसप्रायः । सदयो वक्ति-कथम् । सोऽवक्-श्रृणु यदि कौतुकम्-अत्र पुरे श्रेष्ठि-दन्ताकस्य सुतः सोमदन्तो व्यवहार्यत्र वसति । तथा च कामसेना वेश्याऽतीव-रूप-सौभाग्यपात्रं चास्ति राज्ञो मान्यं पात्रम् । राजा यावती-वेलायां सभायामुपविशति तावती-वेलां सा चामराणि ढालयति । तस्या गृहे य आगच्छति नरस्त-त्पार्श्वे षोडशोत्तराणि पञ्च शतानि द्रम्मानाम् गृह्णात्येषा । एकदा [स सोमदन्तो व्यवहारी] स्वप्ने स्वगृह आगतो दृष्टोऽनया । तेन सार्धं रेमे । प्रातर्वेश्याः सर्वामेलयित्वा वक्ति तत्स्वरूपम् । ताः प्राहुः-५१६ गृहाण तत्पार्श्वे शीघ्रं गत्वा । ततस्तयाऽक्का प्रेषिता । सा तत्पार्श्वे मार्गयति । स नार्ययति । विवादे जाते सालङ्घयति सत्यां [लोकस्ता] पर्यवसापयति, अर्धप्रदानादिना । सोमदन्तो वदति-मुधा झगट

के कर-माद्दामि। कूट-झगटके कथं मम पार्श्वेद् गृह्णात्येषा। सूर्यप्रासादेऽत्र स कलकलः। अद्य तृतीयं दिनम्। लोकपर्यवसापयति। सा न मन्यते। कुमारः कौतुकी वक्ति-गम्यते। कौतुकं विलोक्यते। ततः समित्रः स तत्र [गतः] सभ्या वदन्ति-एष नवीन आगच्छति। एष यद्वदति तत्करिष्यस इति अक्का यै प्रोक्तम्। सा तं नव-यौवनं दृष्ट्वा हृष्य। एष योवन-मदोन्मत्तो वा वेश्यापक्षं करिष्यतीति मत्वा प्रमाणम् (?) यत् एवंविधा नरा वेश्यानुरक्ताः स्त्री-वशा भवन्ति। यदि स्थविरः कोऽपि वेश्या-पक्षं न करोति नीराग-चित्तत्वात्। अतो म एष न्यायकर्ताऽस्तु। सर्वैरपि मानितम्। ततः स आकार्योपवेशितः। कथितो झगटक-वृत्तान्तः त्वं न्यायं कुर्विति तैरुक्ते कुमारेणोक्तं-यदि मयि न्यायस्तिष्ठति तदा मम वचो नोल्लङ्घनीयम्। तैरुक्तम्-तथेति। ततः सदयः पूर्वं वेश्यायै प्रोवाच-त्वं तृतीयं भागम् वा गृहीत्वा त्यज झगटकम्। सा वक्ति-एकं लोष्टिकं न्यूनं न गृहीष्यामि। पूर्णं गृहीत्वा यास्यामि। त्रिचतुरैरपि दिनैर्नान्यथा। ततः सोमदन्त-श्रेष्ठिनं प्रति स आह-एषा राजमान्यत्वान् न मन्यते मम वाक्यम् तदा नापमान्या,

यतः -

योन पूजयते गर्वादुत्तमाधम-मध्यमान्।<br>
भूपासन्नान् स मान्योऽपि, भ्रश्यते दन्तिलो यथा॥ २५६

**दन्तिल-मन्त्रि-कथा**

वसन्तपुरे दन्तिलो भाण्डपतिः। पुर-लोक-नृप-कार्यं कुर्वता तेन सर्वे जनास्तोषिताः। अन्यदा स्व-सुत-विवाहे राज-लोकाः पुर-लोका भोज्य-वस्त्रादिभिः सत्कृताः। तथा सान्तःपुरो राजा पूजितः। अथ तस्य नृपस्य गोरम्भको नाम गृह-सम्मार्जकोऽनुचित-स्थान उपविष्टः सन्नर्धचन्द्रेण निष्कासितः। सोऽपि तदादितोऽपमानान्-निद्रां न लभते। कथं मयाऽस्य राज-प्रासादात् क्षतिः कार्या। यद्वा किं मयाऽस्य कर्तुं पार्यतेऽथवा किमेतत्। ततो नृपस्य निद्रागतस्य शय्यां सम्मार्जयनिदमाह-अहो! दन्तिलो धृष्टो यतो राजमहिषीमालिङ्गति। तच्छ्रुत्वा राजा ससम्भ्रममाह-भोः किं सत्यं यद्देवी दन्तिलेनालिङ्गिता। गोरम्भको [वदत्] देव न जाने रात्रौ जागरण-वशादधुना निद्रालुना मया किमप्युक्तम्। राजा सेर्ष्यं [मनस्यचिन्तयत्-] नूनमसौ मम गृहेऽप्रतिहत-गतिः। तदनेन दृष्टं भविष्यति। अतोऽनेनैवमभिहितम् स्त्रीविषये तु कोऽत्र सन्देहः। तदादितो राजा तदुपरि प्रसादविमुखोऽभूत। किं बहुना प्रवेशोऽपि निषिद्धः,। ततो दन्तिलोऽपि तथा दृष्ट्वा चिन्तयति-किमहो राजाऽकस्माद्विमुखो जातः। मया किमपि विरुद्धं नाचरितं तदा किमेवम्। तथाऽन्यदा दन्तिलं द्वारपालै रुद्धं दृष्ट्वा गोरम्भको विहस्याह-भो द्वारपाला अयं स्वयं निग्रहानुग्रह-परःतदनेन निषिद्धेन मद्वदर्धचन्द्रो युयमपि प्राप्स्यथ। तच्छ्रुत्वा दन्तिलश्चिन्तयति -

अकुलीनोऽपि मूर्खोऽपि, भूपालं यो निषेवते ।
अपि सन्मान-हीनोऽपि, स सर्वत्र हि पूज्यते ॥ २५७

इत्यादि बहु विचिन्त्य विलक्षास्य: तं गोरम्भकं वस्त्रयुगेन सम्पूज्याह-भो भद्र त्वं तदा रोषान्न नि:सारित: किन्त्वमात्यादिस्थान उपविष्टत्वान्नि:सारित: । तदपि क्षम्यतां त्वं मे भ्रात: । सोऽपि तेन वस्त्र-युगेन हृष्ट: प्राह-पुना राज-प्रसादकृते यतिष्ये [पश्य] । मम बुद्धि वैभवम् । स्तोक-दिनैस्ते राजप्रसादं कारयामीइत्युक्त्वा पुनरपि तथैव गत्वा निद्राजुषो राज्ञ: शय्या-सम्मार्जनं कुर्वन्निदमाह-अहोऽविवेकोऽस्मद्राज्ञो यत पुरीषोत्सर्गं कुर्वन् चिर्भटन् भक्षयति । तच्छ्रुत्वोत्थाय सक्रोधमाह राजा-रे मूर्ख त्वां कर्मकरं भणित्वा न व्यापादयामि । वयमेवं कुर्वत: कदा दृष्टा: ? सोऽपि पूर्ववदाह । तदा राजा चिन्तयति-न किञ्चिदेतत्पूर्वमप्येवमेवोक्तं भविष्यति । ततो दन्तिलोऽपि राज्ञा सम्मानित: ।(इति)

अतोऽहं ब्रवीमि-यान पूज्यते तेन ५१६ यूयमानयत । इत्युक्ते सा हृष्टा । द्रव्यानयन-वार्ता श्रुत्वा श्रेष्ठी ब्रूते-मम द्रव्यमन्यायेन किं निर्गमयसि । कुमारेणोक्तम्-मम वचनमुल्लङ्घयसि तदाऽहं न्यायं न करिष्ये । बलात्कारेण धनमानायितं तेन् सार्धमेक आदर्शश्च । कोऽपि न वेत्ति किं करिष्यति । ततस्तेना दर्शाग्रे धनं मुक्त्वा वेश्यायै प्रोक्तम्-गृहाणादर्श-प्रतिबिम्बितं धनम् । अग्रस्थं धनं हस्तेन स्पृष्टुमपि न ददामि । सा प्राह-एवं कथं कुमार ऊचे-अयं तव गृहे स्वप्न आगत: प्रत्यक्षेण वा । अयं यदि प्रत्यक्षेणागतस्तदा प्रत्यक्षस्थं धनं गृहाण । यदि स्वप्ने तदा प्रतिबिम्बस्थमेवधनं गृहीतुमुचितं स्वप्न प्रतिबिम्बयोरेकसदृशकार्यभवनात् । तत: सभ्याश्चमत्कृता: साधु साधु वदन्ति । अहो ! बुद्धिकौशलं तव । सा सर्वैरपि विगोपिता । अस्माभिरर्धे दापिते न मानितं तदा गृहाण पूर्णम् । लोष्टिकं न्यूनं मा गृह्णीया इत्यादि प्रकारैर्हसिता च । श्रेष्ठी स्वधनं गृहीत्वा गृहे गत: । गता सा स्वगृहे चक्षुषी प्रमार्जयन्ती । तामागच्छन्तीं दृष्ट्वा कामसेना चिन्तयति-आनीतानि ५१६ यत उत्सुकाऽऽगच्छति । पृष्टं च तया-आनीतानि किं तानि । सा त्रि-दिन-बुभुक्षिता लोकै: खेदिता च वक्ति-एकेन टुण्टकेन विगोपिता । कामसेनाऽपृच्छत्-मात: कथं विगोपिता । सा प्राह-वैदेशिक: कोऽपि टुण्टको न्यायमीदृशं चकार । ततो लोकैर्विगोपिताऽहम् । कामसेना चिन्तयति-अहो ! बुद्धिस्तस्य । सा तत्र सूर्यप्रासादे नाटक-करणमिषेण शीघ्रं तद्विलोकनाय गता । मण्डितं नाट्यं । सा नाट्यं सृजन्ती तं दृष्ट्वा चिनायति-आस्यं पूर्णशशी विलोचन-युगं विर-मेरमिन्दीवरं ।

कण्ठ: कम्बुश्रणौयै काञ्यनशीला स्कन्धौ च पूणौ घटै । बाहू शौर्य-गजेन्द्र-यन्त्रण-महऽडलानौ करौ चारुणाम्भोजै वर्षा सुधाञ्जनं नयनयो: केनैष सृष्टो युवा ॥ इति विलोकयति । ततस्तस्या: कामज्वरश्चटन् प्रकर्षो भवति । ततो ज्वलज्ज्वर-पूरेण मूर्छिता भूमौ पपात । निश्चेष्टा बभूव । कटुंक्राथोत्तेलकादि-करणैर्न जागर्त्ति । तत उत्पाट्य गृहे नीता सा । एको वैद्यो ज्व(?) जराक्रान्त-देह आकारित: ।

यतः -

अलं जरा [करोतीह], राजानं भिषजं गुरुम् ।
विडम्बयति पण्यस्त्री-मल्ल-गायन-सेवकान ॥ २५८

स देह-रोगमदृष्ट्वा काम-ज्वर-चेष्टां विलोकयति । तच्चेष्टाभिर्ज्ञात-काम-ज्वरः पृच्छति-अनया कोऽपि रूप-सौभाग्यवान् नरो दृष्टः । ताभिरुक्तम्-अमति । वैद्येनोक्तम्-तं पुरुषं दृष्ट्वा काम-ज्वराभिभूतेयम् । न देहरोगोऽस्या आसीत् । तेन तमस्या मेलयत् यथा सज्जीभवति । ताभिरुक्तम् सत्यं सत्य मेवमेवाभूत् गतो वैद्यः । प्रेषिता दास्यः शीघ्रं सूर्यप्रासादे । तत्र गत्वा ताभिरुक्तम्-देव अस्मत्-स्वामिनी त्वामाकारयति । कुमारश्चिन्तयति-अन्यत्र क्वापि स्थास्यते पञ्च दिनानि । एतास्तु मानं दत्त्वा मामाकारयन्ति ततोऽत्रगम्यते ।

यतः -

जे के वि जंति देसंतरेइ, जाण यन भारिया सज्जा ।
दोहग-जाया जाणं, ताण य वेसाययणं सरणं ॥ २५९

तस्यागृहे यास्यामीति मित्रं वक्ति । स तं वक्ति-तत्र त्वां नीत्वा ५१६ अनर्पण-वैरं वालयिष्यन्ति । हसित्वा कुमारो ब्रूते-गान्धर्विकाः किं वैरं वालयिष्यन्ति मां प्रति । मित्रमाह-कुमार वेश्यानां विश्वासं मा कृथाः ।

यतः -

जूएण जुव्वणेण य, वेसा-संगेण धुत्त-मित्तेणं ।
अब्भे विकरं (?) को सो, अवसाणे जो नहु विगुत्तो ॥ २६०

आंखिइ रोइ मनि हसइ, जण जाणइ ए रत्त ।
वेस विसिट्ठह तं करइ, जं कट्ठह करवत्त ॥ २६१

सदयो वक्ति-मित्र वेद्मि चरितमे तासां, एता मां नदी-मध्ये यातयिष्यन्ति । ततो गतस्तत्र समित्रः । कामसेना स्नान-भोजनादि-क्रियाभिस्तं प्रीणाति । प्रीतिरभूद्र्यो गतः काम-ज्वरः । द्वितीय-दिने स्व-फलकादि गृहीत्वा चलति । तावता सा वक्ति-क्व यासिअथ स आह-क्वाप्यन्यत्र स्थीयते । सा वक्ति-अमूनि गृहाणिं त्वदीयानि, अत्रैवस्थीयताम् । किमन्यत्र गमनेन। कुमारोऽवग्-एवमस्तु । स्थितश्चत्वारि दिनानि तत्र । ततो द्यूत-स्थानेऽगात् तावता द्यूतकारा आगताः । ५२ वीरा अप्यांगताः । तैः प्रोक्तम् भो रमणार्थ-मागतौऽसि । धनं क्व। सदयोऽवक्-भो, ममा खड्गं भवतां स्वर्णं पणमस्तु तैरुक्तम् एवं भवतु । देवी-वर-प्रभावा ते हारैहृष्टाः ।

यतः -

व[य]रह हवइ राडी मीठी, वयरह मीठी सारि ।
प्रेमह मीठउं रूसणुं, जूअह मीठी हारि ॥ १ ॥ २६२

तेन तेऽधुना जयाम जयामेति चिन्तयन्तो बहु बहु स्वर्णं पणी कुर्वन्ति । सदयो जयत्येव। ततो मित्राय कियत् स्वर्णं दत्तम् । बहु गृहीत्वा दोसी-हट्टे गतः । पट्टकूलादि-सार-वस्त्राणि गृहीतानि स्वकृते पत्नीकृते च । गान्धिक-हट्टा कर्परक-सिन्दूरादि गृहीतम् । सौवर्णिक-हट्टे । विविधाभरणानि जगृहे । सर्वमेकत्र कृत्वा सोमदत्त-श्रेष्ठि-हट्टेऽमुचत् । यदा मार्गयामि तदाऽर्पयेरित्युक्त्वा। शेषं स्वर्ण वैश्यायायर्पयति । एवं चतुर्भिर्दिनैर्लक्ष संख्या-धनमर्जितवान्। ततः पञ्चम-दिने प्रातरेवोत्थाय सदयः स्व-फलकासी जगृहे । रजोभृतं हस्तेन प्रस्फोटयति। कामसेनया पृष्टम् (अय) फलकासी कुतो-हेतोर्गृहीते। कुमारः प्राह-चलिष्यामि। सोचे-तव चलनेऽहं म्रिये । नाऽहं चलनाय ददे । इति तया निषिध्यमानोऽपि चलत्येव । तदा सा प्राह -

वसिऊण मज्झ हियए, जीअं गहिऊण कत्थ चलिओ सि ।
हे पहिय पंथ-मंडण, पुणो वि तं कत्थ दीसिहसि ॥ २६३

इत्याद्युक्तोऽपि न तिष्ठति । ततस्तया फलकं गृहीतम् । स न मुञ्चति । इत्थमितस्तत आकृष्यमाणात् फलक-खोलीआमध्यादेकं शुष्क-पद्मिनी-पत्र-वेष्टितं गुच्छलकं पपात कुमारेणाज्ञातम्। तावता वेश्ययौत्सुक्याद्गृहीतमुद्वेष्टितं च । मध्ये मौक्तिक-जडितं कञ्चुकं पश्यति। दृष्ट्वा सा मार्गयति । कुमारोऽपि चिन्तयति-नूनं तैः पञ्च-वीरैरेव ममाजानतोऽयमत्र फलके क्षिप्तः। लीला-गर्भेश्वरः सत्यः-तस्यायर्पयति ।

यतः -

कियती पञ्चसहस्री, कियन्ति लक्षाणि कोटिरपि कियती ।
औदार्योन्नत-मनसां, रत्नवती वसुमती कियती ॥ २६४

ततोऽक्का रुष्टा व्यवहारि-५१६-अनापन-दूनाऽपि चिन्तयति-अयं बुद्धिमान् दान शौण्डश्च। कीदृक् ५१६ । किञ्चैकदानेन बहून्यपि ५१६ दत्तानि युगपदेवानेन। ततोऽक्काऽऽशिषं ददौ। अत्याग्रहेण स्थापयति तथा-पि कुमारो न तिष्ठति पत्न्या अग्रे पञ्चम-दिने निश्चया-गमन-प्रतिज्ञा-करणात्। ततस्तस्य निश्चय-गमनं ज्ञात्वा कामसेना प्राह-यदि यास्यस्येव तदा भोजनमकृत्वा गन्तुं न दास्यामि । ततो भोजनार्थं स्थितोऽसि-फलके तत्रैव मुक्त्वा द्यूत-स्थाने गतश्च द्यूतेन धनार्जनैक-रसिकत्वात्। तावता कामसेना दासीनां भोजन-सामग्री-करणायदशं ददौ । स्वयं राज्ञः सेवावसरे जगाम। तमेव कञ्चुकं वर्य-वस्त्राभरणानि परिधाय पर्यङ्किकारूढा याति ।

कुलस्त्रीणां सुखासन उपर्याच्छादन पटो भवति । सा तु निर्लज्जतयाऽऽच्छाद न-पटो नादत्त । उद्भर-वेषा चतुष्पथे व्रजन्ती सर्वैरपि विलोक्यते । तदैकेन व्यवहारिणा सा कञ्चुकिकोपलक्षिता-एषा कञ्चुलिकाऽस्माकं खात्र-पातेन गताऽभूत । साऽधुना मयोपलक्षिता। ततो हट्टादुत्थाय पुनर्निश्चय-करणाय तस्याः पार्श्वे जगाम । पर्यङ्किका-दण्डे लग्नो व्रजति । वार्तां कुर्वन् हृदयस्थकञ्चुकं विलोकयति । व्याख्यानयति कुत एष इत्यादि-कपट-वार्ताभिः । स्वकीयं तं निश्चित्य स्वहट्टे गतः । सर्वे व्यवहारिण एकत्र मेलिताः । स्वरूपं प्रोक्तं । हट्टताला कृता । वेश्या-पार्श्वे कञ्चुक-सद्भावं कथितं च । ततो मिलित्वा सालवाहन-राजान्तिकं गताः । राज्ञा बहुमानपूर्वं प्रोक्तं-महाजनोऽनाकारितः केन कारणेनागतः । ते वदन्ति-व विज्ञप्तये राज्ञोक्तम् -किं भवतां कोऽपि पराभवति । तैरुक्तम् देव त्वयि स्वामिनि कोऽस्माकं पराभवति । व्व भास्वति भास्वत्यन्धकारपराभवः । परमपरं वासाय स्थानं देहि । राजा प्राह-भो महाजनाः द्वावपि प्रकारौ [कथं] कुरुथ । यदि केनापि न पीड्यमानाः स्थ तदाऽन्यत्र वासाय स्थानं कस्मादया चथ । परं केनापि पीड्यमानाः स्थ तदैवमुच्यते भवद्भिः । ततः कथयत सम्यक्स्वागमकारणं । ततो रामदेवः श्रेष्ठी समस्ययाप्रोचे-देव क्षेत्रेषु यत्कर्षकैः पात्यते तद्भवन्नगरे श्रीमतां गृहेषु चौरैः पत्यमानमस्ति । राजा विद्वान् प्रोवाच-किं खात्रं पपात क्वाऽपि । महाजनेनोक्तम्-एवमेव देवेह चौराणामग्रे स्थातुं न शक्यते । राजा चिन्तयति -

> भूपो वृक्षः स्व-प्रजास्तस्य मूलं, भृत्याः पर्णा मन्त्रिणस्तस्य शाखाः ।
> तस्माद् राज्ञा स्व-प्रजा रक्षणीया, मूले गुप्तेनास्ति वृक्षस्य नाशः ॥ २६५

इति विचिन्त्य तलारक्षमाकार्य प्रवक्ति -

> रे रे निस्त्रप रक्षकाधम मम प्राण-प्रियाऽस्ति प्रजा,
> प्रेतेश-प्रतिमेन सेयमनिशं स्तेनेन निष्पीड्यते ।
> त्वं त्वादाय मदीय-वेतन-धनं प्रेयोङ्गना-सङ्गतम्
> त्यक्त्वा नागर-रक्षण-व्यतिकरं निद्रायसे रे सुखम् ॥ २६६

तलारक्षेणोक्तम् स्वामिन् मम यं दण्डं कर्तुकामोऽसि तं कुरु । किं करोमि । मम विलोक्यतोऽपि चौरो न लभ्यते । दुर्ग्राह्यो दुरन्तश्च खर्पर-चौरवत् । राजाऽऽह-खर्पर-चौरः कः । तलारस्तत्स्वरूपं वक्ति-**खर्पर-चौर-संबन्धः** तथा स्तम्भतीर्थे कोऽपि व्यवहारी भद्र- नामा । तस्य पुत्रो जिनदासः तत्रैव पुरे व्यवहारि-सुतां परिणायितः । तद्वास-भवन-पार्श्व-स्थित-वटे कोऽपि यक्षो वसति । तद्भार्यां दृष्ट्वा मोहितस्तां रन्तुमिच्छुः पुनः पुनरागच्छति परं तत्-पति तेजसा स्प्रष्टुमपि न शक्नोति । बहूनि वर्षाणि गतानि । एकदा स व्यवहारि-सुतो वाहने चटितः । तद्भार्या स्वावास-भवन एव सुप्ता । तदा यक्षोलब्धावसरो द्वितीय-दिने पुत्ररूपं विधाय पितुः प्रणाममकरोत् । पित्रापृष्टो-वत्स वाहने चटितः । स वदति-तात अहं प्रागन भ्यासाद् वाहने स्थातुं

न शक्नोमि । मूर्च्छैवागच्छति । ततो नाखूआकस्य सर्वशिक्षां दत्वा स एवागतः प्रहिताः । अहं पश्चाद्वलितः । पित्रोक्तम्-वरं कृतम् । ततो निःशङ्कं स यक्षस्तद्वध्वा सह रमते । त्रि-चतुराणि वर्षाणि जातानि। ततस्तस्या गर्भोऽजनिष्ठ । औदारिक-वैक्रिय-देहयोर्योगे गर्भोत्पत्तिर्जायते। कियद्दिनैः श्रेष्ठि-सुतः पश्चादागतोऽसंख्य-धनमर्जयित्वा । लोका वर्धापनिकां मार्गयन्ति-श्रेष्ठिन् तव पुत्रोऽद्यागात् । श्रेष्ठी चिन्तयति-लोका न जानन्ति मम पुत्रो गृह एवास्ते। तमागतं ज्ञात्वा व्यन्तरो नष्ट्वा गतः। पिता सम्मुखोऽगात् । तत्र स्व-सुतं दृष्ट्वा [व्यचिन्त यत्-] केनापि दुष्टेन व्यन्तरेण पुत्र-रूपं कृत्वा छलितोऽस्मि । [स] कृष्ण-मुखो बभूव लोकापवादो भविष्यतीति। चिन्तातुरं मुखं दृष्ट्वा पुत्रः प्राह-तात बहु-वर्षैर्मदागमने तव न हर्षोल्लास-स्तत्कारणं किम् । गृहे गमनानन्तरं कथयिष्यामीति वारित । गृहागतस्य पुत्रस्य व्यन्तर-कपट-स्वरूपं कथयति । सुतेनोक्तम् - तात व्यन्तर-स्वरूपं पुराऽप्यहं वेद्मि । पिताऽऽह-यद्येवं जानन्नभूस्तदा ममेतत् पुरो न प्रोक्तं कुतः । सुतेनोक्तम्-लज्जया नोक्तम् । ततो गर्भा जातः । स न बहिस्त्यज्यते । तद्भाग्येन यादृग् भवतु । ततः पुत्रो जातो रात्रौ दुकूलाच्छादितो वाटिकान्तर्मुक्तः। तदैवोज्जयिनीपुर्यधिष्ठात्रीदेवी हरसिद्धिराकाशे यान्ती यान(स्खलन)ततोऽधो विलोकते । दृष्टः स बालो लक्षणालङ्कृतः । देव्या स्वपुत्रत्वेन प्रपन्नः प्रत्यागच्छन्त्या मया ग्राह्य [इति विचिन्त्य] काकाद्युपद्रव-रक्षार्थं घट-वाकर्पटे (१ खर्परेणा) ना च्छाद्य मुक्तः । प्रत्यागतया गृहीतः । पालनाय वाटिकाधिप-मालिकायार्पितः । अर्पित । तेन खर्पराच्छादितत्वात् खापर इति नाम दत्तम् । सप्ताष्टवार्षिकः सन् देव्या नानारसौषधीः पायितः रात्रौ वासुदेव कटकेनायजेयो दिवसे तृणेनाऽपि म्रियस इति वर-दानं ददे देवी। उज्जयिनीं नीतर-तत आरभ्य गिरिनारं यावत् सुरङ्गा दत्ता, तत्र मुक्तो वर्धितो देव्या । दिवा तत्रैव तिष्ठति रात्रौ चौर्यस्य व्यसनं समजायत । नगर- मध्ये चौर्यं करोति। लोकैर्विक्रम-नृपाग्रे रावा कृता। राज्ञा तलारक्षमाक्रोश्य रक्षा कारिता । परं चौरो न लभ्यते । इतश्च नवलक्ष-तिलङ्ग-देशाधिपस्य तैलप-देवराज्ञः पुत्री शृङ्गारदेवी । तत्पाणिग्रहणाय जगाम विक्रमः, भट्ट मन्त्र्यादि-प्रधानानां पुरं भलाटय । राजा तां परिणीय कालेनागाच्च-मुहूर्ताभावादुद्यान-वाटिकायां स्थितः । मन्त्रि-प्रभृतीभ्या मिलनायागुः । पृष्टं पुर-समाधि-स्व रूपम् । लोकैरुक्तम्-सामस्त्येनाधिरस्ति, चौरैः सन्तापितो लोकः । राजाऽऽह-तलाराः किं कुर्वन्तः सन्ति । लोका वदन्ति-रङ्का रङ्कानां बाहो विलग्ना सन्ति । एतैः किं स्यात्। राज्ञा तदैव प्रतिज्ञाऽग्राहि-चौर-निग्रह-करणं विना पुरान्तः-प्रवेशं न करोमि । तां नवोढां राजा तैः सार्धं गृहे प्रेषयति स्म । खापरेण तज्ज्ञात्वा मार्गत एव तामाहृता सुरङ्गान्तर्मुक्त्वा । हरसिद्धि-प्रासाद-मत्तवारण उपविष्टेऽपर-पञ्च-चौर युतः । राज्ञा लोकेभ्यो राज्ञी-हरणं श्रुत्वाऽचिन्ति-मया स्व-राज्ञी रक्षणं कर्तुं न पार्यते कथं लोकरक्षणं करिष्ये । ततोऽग्नि-वेतालं स्मृत्वाऽन्धकार-पटमानाययति । तेन स्वमाच्छाद्य खड्ग-पाणिर्हरसिद्धेः प्रासादेऽगात् । तत्र स दृष्ट चौरं ज्ञात्वा चौर-रूपं कृतं राज्ञा । मिलिताः परस्परम् । तन्मुख्येन पृष्टः-क्व वससि तेनोक्तम्आसन्न-ग्रामे ।

वीकउ इति नाम। चोर्येणैव मे निर्वाहः। तैरुक्तम्-अस्मत्सार्थे भारोद्वहनायागच्छ। तवापि भागं दास्यामः। तेनोक्तम-ओमिति। ततः षडपि पुरान्तः प्रविष्टा गताः कान्दविक-गृहे। माङ्कू प्रतिपन्न-भगिनीमाकार्य खाद्यं गृहीतं भक्षितं च तत्रैव। त्वमपि भक्षयेत्युक्ते राजाऽऽह-नाहं भक्षयामि। माङ्कूः पृच्छति-क एषः। तैरुक्तम्-एषोऽपि मिलितोऽस्ति। किं नाम। तैरुक्तं वीकउ क्षत्रिय आसन्न-ग्रामवासी। साऽतीवधूर्ता चिन्तयति-एते मूर्खा विक्रमं नरपतिं न जानन्तः सन्ति, यतोऽद्य राजा प्रतिज्ञावान् चौराणां चराचरं विलोकयन्नस्ति। स एव मिलितः सम्भाव्यते। तयोक्तम् तत्प्रीत्यर्थम्-स मम भागिनेयो रुचिरं रक्षणीयः। भगोऽपि देयः। तैरुक्तम् ओमिति। ते निःसृत्य चलिताः। आगच्छ भो भागिनेय। माङ्कू-भागिनेयत्वादस्माकमपि भागिनेयः। ततो राज-भवनं गता। राजा तच्चराचरं विलोकते। तावता पञ्च राज्ञो गृहीत-सङ्केतास्तैः कामिताः। षष्ठस्य कृते षष्ठयाकारिता। सा वक्ति-विक्रमं नरोत्तमं प्राप्याऽपरैः समं कथं भोगेच्छा सा मन्यते न। तदपि दृष्टम्। राज्ञ्यः पार्श्वाद् रत्न-पेटीर्गृहीत्वा निर्गताः षडपि। तैः सर्वा अपि राज्ञ उत्पाटनाय चाऽर्पिताः तेनाऽग्निकस्याऽर्पिताः। तत आगत्य ते सुरङ्ग-मध्ये गताः। शिलां पश्चात्कृत्य। एतावता रात्रिर्विभाता। दिनोदये द्वारस्थान् चतुरश्चौरान्नि हत्य राज्ञोक्तम्-रें खापरक! तव विक्रमो रुष्टः। खड्गं-गृहाण। दर्दे(?)स रङ्को हतो। राज्ञा लोकानाकार्य स्वं स्वं धनं समर्पितं तेभ्यः। प्रतिज्ञा-पूरणाद्धृष्टो नृपः पुर-प्रवेशमकरोत् समहोत्सवं। दुःशीलाः पञ्च राज्यो निष्कासिताः। सुशीला पट्टराज्ञी कृता। लोकाश्चौरोपद्रव-रहिता जाताः। खापर-सम्बन्धः।

तद्वदत्राऽपि चौरा दुर्ग्राह्या इति तलार-वाक्यं श्रुत्वा [राजा महाजनं प्रत्यपृच्छन्-भो महाजना युष्माकं किं] वस्तु चौरेण गृहीतमस्ति। तदा महाजनेन पूर्वमिव समस्यया प्रोक्तम्-हे स्वामिन् तद् वस्तु कन्दर्प चमूः स्थल-मण्डनीभूतमस्ति। राज्ञा पर्यवसितम्-कामसेना-हृदये कञ्चुकः किं मुहराई(?) महाजनोऽवग्-देव त्वं। चतुर-चूडामणिः सप्तशती-सालवाहन-ग्रन्थादि-कर्ता कवि-चक्रवर्ती। एष कञ्चुको मासात् प्रागस्य कामदेव-व्यवहारिणो गृहे खात्रं पपात तदा गतोऽभूत। सोऽद्य दृष्ट उपलक्षितश्चानेनाभिज्ञानेन बहु धनं गतमस्य। ततो राज्ञा पृष्ठा-सा-हे कामसेने कथय केनेयं तव कञ्चुलिका दत्ता। सा प्राह-देव अस्माकं गृहे नर-विर-चौर-वरड-साध्वसाधु-जना [बहव] आगच्छन्ति। अस्माकं नाचारो यत्कस्याप्यग्रे कस्यचित् कथ्यते। तेषामस्माकं च मनांसि जानन्ति। यदि वयं कथयामस्तदाऽस्मद्गृहे भयेन न कोऽप्यागच्छति। राज्ञा साम-दान-दण्डादिप्रकारैः पृष्टाऽपि नाकथयत्। ततो रुष्टो राजा दण्ड-पाशकानाकार्य प्राह-अस्याश्चौर-दण्डं कुर्वन्तु शूलिकाभेदेन। शत शोऽपि पृष्टा एकपदेनैवाऽभवत्, न पुनः प्रष्टव्यं। यतोऽस्या गृहे चौरारि-तष्ठन्ति मया पृष्टाऽपि न वक्ति। एतेन दण्डयोग्यैषैव। बहु-दान-मान-प्रदानैरपि नह्यात्मीयैषा।

यतः -

पासा वेसा अग्नि जल, ठग ठक्कुर सोनार ।
ए दस न हूइ अप्पणां, मंकड बडूअ बिलाड ॥ २६७

तदादेशेन तलारस्तां दृढं बद्ध्वा चौर-निग्रह-स्थानं शूलिका-स्थलं नाम स्थलं प्रति चचाल। तस्याः शेष-परिवारः शीघ्रमक्कायै तत्स्वरूपमकथयत्। अक्का वदति-अरे कामसेनायाः केन हेतुना शूलिकाभेदं कारयति नृपः । परिवारेणोक्तम्-कञ्चुक-पदे। अक्काऽऽह-स कञ्चुक-दाताऽद्योप्यत्राऽस्ति। तस्मिन् सति कामसेनायाः कः सम्बन्धो दण्डकरणे। तदैव द्यूतस्थानस्थं तं कुमारं प्राह अतिक्रोधाकुला-तव कञ्चुलिकां ज्वालय या कामसेनायाः कलिः । कुमारः प्राह-कथं कथम् तया प्रोक्तम् तत्स्वरूपम् । तावता तलारेण शूली-स्थाने नीता कामसेना। शीघ्रं धावति सदयस्ततः स्थानादेव। यावता खड्ग-ग्रहणायायाति तावता तस्या मरणं भवेत्। तत्र गतः प्राह-भोस्तलार नहीयं चौर-दण्डार्हा। कञ्चु कचौरोऽहम्। शूकाराः क्षेत्रं खादन्ति पट्टक - मुखानि कुट्टयसि । मुञ्चेताम् । मम कथय यत् कथनीयमित्यादि । कामसेनाबन्धनानि च्छिनत्ति। तां मुमोच बलेन। तलारो रुष्टस्तन्मारणार्थं धावति। ततः कुमारेण कङ्कलोह-क्षुरिकया तन्नाशां छित्त्वा प्रोक्तम्-रे वराक त्वं मुक्तोऽसि जीवन । किं तव रङ्कस्य घातेन । परमेतावता मारित एव जानीहि। एवंविधोऽपि स्व-कुटुम्बाय मिल। याहि याहि स्वमुखं लात्वा। कथय तव राज्ञश्चौरो लब्ध इति । स्वयं कुमारः शूली-स्थाने स्थितोऽसि-फलक-रहित एव। तलार-नाशा-छेदं श्रुत्वा केऽपि लोका हृष्टा वदन्ति-वरं जातं यत एष कोट्टपालो जनानां बलेन वृषभ-शकट-खट्वादि-ग्रहणेनोद्वेजकोऽभूत । तलारो राज्ञः पुरो गत्वा मुखं दर्शयति । राज्ञा पृष्टे कामसेना-मोचन-स्वरूपमकथयत् । राजा पृच्छति-केनमुक्ता। स वक्ति-नोऽहं वेद्मि । ततो रुष्टो राजा बहु-कटक-प्रेषणेन तन्निग्रहाय सेनानीं प्राहिणोत्। कटकेन वेष्टनं करोति तन्मारणाय सेनानीः । युद्धं बहुवेलां यावद्धरसिद्धि-देवी-प्रभावात् क्षणात् कटकं भग्नं कुमारेण । तेषामेव धनुर्बाणान् गृहीत्वा तैरविद्धान् नामुचत कटक- भयन् कानवि । ततो नगर-जनो बाल-गोपालादिः कौतुकं-विलोकनाय तत्रागात्। लोकास्तत्पराक्रमं दृष्ट्वा वदन्ति-अहो एष चौरः सर्व-कटकेनाऽपि जेतुं न शक्यते। तावता तत्रा-गतेन सोमदत्त-व्यवहारिणा स उपलक्षितः । अहो एष स एव येन मम ५१६-झगटकं निर्वालितं निजबुद्धया। ततोऽहमस्य पार्श्वेगत्वा पृच्छामि किमेतदिति। ततस्तलारस्य कथयित्वा तदनुमतिं च गृहीत्वा गतः कुमारान्तिके प्रोक्तं च श्रेष्ठिना-भो नरोत्तम मामुपलक्षयसि । कुमारः प्राह-ओमिति । श्रेष्ठी पृच्छति-कोऽयं तवाऽनर्थ-प्रकारः । केन वा चौरस्या ल दत्तं तव। कुमारो हर्षोज्ज्वल-चित्तः प्राह-श्रेष्ठिवर-मया स्वयमेवाङ्गीकृतं कौतुक-करणाय । श्रेष्ठी ब्रूते-अहो वरं कौतुकमनेन प्राणनाश एव स्यात्। को निर्वाहयिष्यति। कुमारो वक्ति-अहमेव निर्वाहयिष्यामि । श्रेष्ठी वदति-त्वं चतुरो-प्यति-विरूपं कृतवान् ।

यतः -

अव्यापारेषु व्यापारं, यो नरः कर्तुमिच्छति ।
स शीघ्रं निधनं याति, कीलोत्पाटीव वानरः ॥ २६८

**कथाऽत्र**

कुमारोऽवक् -श्रेष्ठि-श्रेष्ठ मा खेदं वह। न कश्चिदोषोऽनर्थ प्रकारो मम कौतुकमात्रमेव। गन्तुं चेच्चिन्तयामि तदैतेषां पश्यतामेव हस्ते तालीं दत्त्वा व्रजामि। परं कामसेनाया अनर्थो भवति तेन तद्रक्षायै स्थितोऽस्म्यत्र। मम तु दुःखं किमपि न भविष्यति। तश्चिन्तां मनस्यपि मा कृथाः। परं ममैकं कार्यमस्ति बाढमत्या x x करणीयम्। त त्वं कुरु। तत्कार्य-करणे मम महानुपकारः कृतो भविष्यति। अपरो नरः कोऽपि नाऽस्ति यस्याग्रे तत्कार्यं कथ्यते करोति च। श्रेष्ठी प्रोचे-कथय किं तत्कार्यं करणीयमस्ति यत्करोमि। स वक्ति-आसन्न-ग्रामे विश्वरूप-भट्ट-गृहे मम भार्या मुक्ताऽस्ति। मयाऽत्राऽगच्छता तस्या अग्रे प्रोक्तं -पञ्चम-दिने प्रहर-द्वय मध्य आगमिष्यामि। तया प्रोक्तं-यदि पञ्चम-दिने नागमिष्यसि तदा निश्चयेन काष्ठानि भक्षयिष्यामि। ततस्तस्याः पुरः पञ्चम-दिनागमन-प्रतिज्ञयात्राऽगतोऽस्मि। तद्द्य पञ्चमं दिनमेकप्रहरश्चटितो मम गमनं तु नाऽभवत्। सा-त्वरितं मदागमनमवेक्ष्यमाणा भृशमाकुलतया तिष्ठति। तेन लेखं लिखित्वा त्वं जनं प्रेषय शीघ्रम्। एवं ज्ञापय च तव पतिरत्र बाढ कार्य-विशेषेण स्थितोऽस्ति। माऽधृतिं कुर्याः। प्रातरादौ समेष्यति। अत्र चौरं कृत्वाऽस्तीति मा लिखेस्तस्याः प्राण-वियोजन-हेतु-भवनात्। ततः सोमदत्तः श्रेष्ठी दयापरः कृत-ज्ञश्चिन्तयति। एष महाभागश्चेन्मोच्यते तदा वरं। अनेन मम प्रागुपकारः कृतोः। अतो ममाऽपि प्रत्युपकार-करणावसरः अथवाऽन्यथाऽपि पर-कष्टं धनेन न स्फोटयति तदा तस्य धनस्य किं प्रमाणं

यतः -

जीणइ अर्थि न भाजइ भीड, जीणइ परनी न टलइ पीड।
सजण मित्र काजि टलीइ, सा संपति, सघली जालीइ ॥ २६९

तथा -

दत्तं न वित्तं करुणा-निमित्तं, लोभ-प्रवृत्तं कृतमेव चित्तम्।
यैः सञ्चयोत्साह-रसानुवृत्तं, शोचन्ति ते पातक मात्मवृत्तम ॥ २७०

ततः प्राह श्रेष्ठी-भो एवं चेदस्ति तदा त्वमेव याहि। अदो झगटकं धन-प्रदानादिनाऽहं निर्वालयिष्यामि।

यतः -

नहि तद्विद्यते किञ्चिद्, यदर्थेन न सिध्यति।
वर्धन्तेऽस्मात्क्रियाः सर्वाः, पर्वतेभ्य इवाऽऽपगाः ॥ २७१

कुमारो वक्ति-नाहं तव झगटकं विलगाड्य यास्यामि। यतो नाहं गज-समो।

यथाः -

गजपतिः श्रान्तश्छायार्थी वृक्षमाश्रितः।
विश्रम्य तं द्रुमं हन्ति,तथा नीचः स्वामाश्रयम् ॥ २७२

श्रेष्ठी प्रोचे-भो अद्य तव स्थानेऽत्राहं स्थितोऽस्मि। त्वमेव स्वं कार्यं कृत्वाऽऽगच्छ। सदयेनोक्तम्-एवं कल्ये निश्चयेन गमिष्यामि। ततः श्रेष्ठी तलारक्षमा कार्य प्रोक्तवान्-हे तलारः राज्ञोऽग्रे कथय सोमदत्त श्रेष्ठी चौरस्य प्रतिभूर्भूत्वैकं दिनं याचते, तं मोचयन्नस्ति। चौरो यद्यागामि-दिन आगमिष्यति तदा तमर्पयामि। नो चेत्तदा यस्य श्रेष्ठिनः खात्रे यद्गतमस्ति तस्य तत्खात्र-धन-प्रमाणं धनमर्पयति। राज्ञोऽपि लक्षस्वर्णं दास्यति। इति ज्ञापयित्वा शीघ्रं चौर मोचनायादेशमानय। ततो गतस्तलारः। कथितं राज्ञे श्रेष्ठि-वाचिकम्-राजा मन्त्रि-पार्श्वे पृच्छति। मन्त्री प्राह-देव सोमदत्तो धन-मदेन मत्तोऽस्तीति चौरस्यास्य प्रतिभूर्भवन्नस्ति। अयं चौरोऽनेन मोचितः पुनः कल्ये किं पश्चादागमिष्यति। श्रेष्ठि-वरः खात्रादिकं निर्वाहयिष्यति। यावत् तु काचिच्छिक्षा लग्ना न भविष्यति तावच्चौरादीनां पटूभवनादिकं कुर्वन्न स्थास्यति। तेन देहि मोचनादेशम्। राज्ञा तलार-मुखेनदत्त आदेशः। तलारेण गत्वा श्रेष्ठिने प्रोक्तम्। मुक्तश्चौरः। स्थितस्तस्य स्थाने श्रेष्ठी। उवाच च तं प्रति-भो अग्रतोऽपि गच्छे र्मा पुनः पश्चादागमिष्यस्यहं भलिष्ये। तेन तत्राऽनुज्ञातम्। हट्टान्तःस्थां स्थापनिकां गृहीत्वोत्सुकोऽभुक्त एव प्रिया-मरण-भवन सम्भावनार्त्याऽसि-फलकादि च मुक्त्वा गतः। तावत्-तत्र द्विपहरानन्तरं सावलिङ्गी भट्टं प्रति वदति-हे बान्धव ममपतिः प्रहर-द्वयं त्रयं यावद् विलोकित-मार्गोऽपि नागतः। तेनाहं जानामि तत्र कुशलं नाऽस्ति, यतश्चतुः षष्टियोगिनीपीठं तत्पुरम्। ततोऽमङ्गलाशङ्कि मच्चित्तं, यतः प्रणयिनृचेतांर-युक्त-वेलातिक्रमेऽधृतिभाञ्जि भवन्ति। तस्मान् मम काष्ठानि देहि। भट्टः प्राह-भगिनि उत्सुका किं भवसि। दिनान्तं यावद् विलोकय। तव पणं ज्ञात्वां गतोऽस्ति सोऽनागतः कथं तिष्ठति। यदि वाऽसौ तव काष्ठ-भक्षणानन्तरमागमिष्यति तदा तस्योत्तरं किं ददामि। ततः सा प्राह-मया प्रहर द्वयमेव प्रोक्तम भुद अधुना चतुर्थः प्रहरोः अतो मम वाचामनेनाऽसतीं मा कुरु। त्वं चेन्मम भ्राता सत्यस्तदा मे काष्ठान्येव देहि। तिष्ठामि न कथमपि।

इकि वईरी नइ वल्लह, हियइ खट्टइ(?खडक्कइ) दुन्नि।
वीसारतां न वीसर इ, वसतां उव्वसि रन्नि ॥ २७३

ततो भट्टेन काष्ठानि बहिः क्षिप्तानि। सा शुचिर्भूत्वाऽऽगच्छति। कालक्षेप-करणाय शनैः शनै रचयति। अग्निना प्रज्वालिता च धूम आकाशं व्यानशे। यावता सदयो ग्रामासन्न

आगात् तावता बहुल-धूमं दृष्ट्वा व्याकुल-चित्तो बभूव। लोचने अश्रुपाताविले बभूवतुः। धूमेनाऽकुलत्वं युक्तं परं धूमदर्शने त्वाकुलत्वं चित्रकारि। ततः स चिन्तयति-एतद्धूमेन ज्ञायते निश्चयेन सा चितां प्रविष्टा ततो हृदय-दुःखार्दितो द्रुतं द्रुतं धावति।

यतः -

कलहंता भक्खंता, भय-संतत्ता कहाणए लग्गा।
पिय-दंसण-ओसरिआ, रिवप्पं वच्चंति मग्गम्मि ॥ २७४

यावता सा चिता-मध्ये झम्पां ददाति तावता लोकैः प्रोक्तम्-भोः कोऽपि पटी-भ्रमण-संज्ञा कुर्वन् द्रुतं द्रुतं धावन्नागच्छन्नस्ति। क्षणं प्रतीक्षस्व। भट्टेन बलेन स्थापिता सा। तावता सदयः समागतो। हृष्टो भट्टो लोकश्च। कुमारेणोक्तम्-प्रिये किमिदं क्रियमाणमस्ति सा प्राह-स्वामिन् प्रहर-द्वयमेव प्रतिज्ञातमभूत। प्रहर-द्वयातिक्रमे काष्ठान्युक्तान्येव प्राक्। परं प्रहरत्रयं यावन्मया प्रतीक्षितं भट्टस्यास्य वचसा। दिनान्तोऽभूत। सदयः प्राह ग्रामं गतस्य प्रहराधिकोऽपि लगति कदाचित् ततः सहसैवं कथं क्रियते।

सा प्राह -

पुन्निम-तिही-विरहिओ, जीयइ चंदो स-तेय-परिहीणो।
वल्लह-विरहे मरणं, होइ पुणो कित्तिअं एअं ॥ २७५

सर्वेषां हर्षः सम्पन्नः। भट्टेन प्रवेशमहश्चक्रे भोजनादिसामग्र्यपि च। ततः प्रियायै वस्त्रालङ्कारादि दत्तं कुमारेण। सा हृष्टाऽभवत्तैः। यतः स्त्रीणां प्रथमं यौवन-सौभाग्य-सुन्दरः पतिः प्रमोदप्रदस्तदनु दुकूल-शाटिकादि वरा सुरा कौसुम्भोत्तरीय-वस्त्र-हार-नूपुर झालि-नगोदर-कनक चूडि-कङ्कण-प्रमुखा अलङ्कारा मनस्तुष्टि प्रदाः। ततः कुमारेण प्रभाते प्रियायाः प्रोक्तम्-ममौत्सुक्येना गमनादसिफलके तत्रैव स्थिते। तेनाऽद्य गत्वा ते आन यामि। सा प्राह कदागमिष्यथः। कुमारोऽव कल्य एवं कदाचिद् घटी प्रहरो वाऽधिको लगति तदा पुर्ववन् न कार्यम्। सा वक्ति - तत्तथैव तेन विलम्बो न विधेयः। तस्यास्तं निश्चय मत्वा स वत्ति-एवं भवतु।

ततः -

चलिओ कुमर रोअंती नारि, अंजण लूहिअ कज्जल वारि।
अबलि न आवउं बोलिइ वारि, जं मनि भावइ करे तिवारि ॥ २७६

ततो द्राग्गतः स तस्मिन् पुरे। तस्मै श्रेष्ठिने प्रोक्तम्-अहमुक्त-वेलायामागतोऽस्मि। त्वं राज-समीपे गत्वाऽऽत्मानमुच्छृङ्खलं कुरु। श्रेष्ठी प्रोक्तवान्-भोः पापिन् त्वं कस्मादागतोऽसि मरणार्थं चेद्भवानागतो नाभविष्यत्तदाऽहं धन-बलेन सर्वं प्राध्वरमकरिष्यं। लोके मम

कीर्तिरभविष्यद् यदनेन दयावता धन-व्ययेनाऽपि चौरो मोचित इति ।

यतः -

भूतानुकम्पा प्रियवागयाञ्चा, लज्जा क्षमौचित्यमुदारता च ।
कृतज्ञताऽन्योपकृतिः सुशीलं, स्थानानि कीर्त्तेर्दश कीर्तितानि ॥ २७७

मम कीर्तिस्त्वया स्व-जीविताशया सह हता । ततः कुमारो ब्रूते-अहो श्रेष्ठिपुत्र उचितमेतद् भवादृशां वक्तुं कर्तुं च ।

यतः -

उपकर्तुं प्रियं वक्तुं, कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ॥ २७८

परमहं तव धन-नाशं कस्मात् कारयामि । नीचानां स्वभावोऽयं यदुपकारिषु विरूपकारित्वं ।

यतः -

छिन्त्यम्बुज-पत्राणि, हंसास्तज्जीविनोऽपि हि ।
सन्तोषयति तान्येव, दूरस्थोऽपि दिवाकरः ॥ २७९

त्वं व्रज । सुखासिकया तिष्ठ । गतः सोमदत्तः श्रेष्ठी राजसभाम् । उक्तं-देव आगतः स चोर अहं मुत्कलोऽस्मि । तच्छ्रुत्वा राजादय आहुः-स चौर आगतः । श्रेष्ठी प्रोच ओमिति । सर्वा सभा चमत्कृता वक्ति-श्रेष्ठिवर । तव सत्त्वं । व्याख्यायते तस्य वा । एके प्रोचुर्द्वयोरपि । तथा चौरस्य सत्यसन्धात्वं पश्यतु यो गतोऽप्युक्तवेलायां समागात्-मृत्युभयेन यो नंष्ट्वा न गतः ।

यतः -

मृत्युभीतस्त्यजत्येव, पितृ-मातृ-प्रिया-सुतान् ।
वज्र-भीत्या त्यजन् सर्वं, मैनाकोऽब्धौ पपात न ॥ २८०

पुना राजाऽनुवदति-अयं प्रतिज्ञा-पालन-निश्चयान् महाकुलः सम्भाव्यते । यतो नीचानामुक्तमपि निरर्थकं ।

यतः -

रासह-रडिअं कुनरिंद-जंपियं इयर-लोय-पडिवन्नं ।
पुव्वं पि होइ गुरुअं, पच्छा पच्छा लहुयरं च ॥ २८१

महतां पुनर्विचलमेव ।

यतः -

दिग्गज-कूर्म-कुलाचल-फणिपति-विधृताऽपि चलति वसुधेयम् ।
प्रतिपन्नममलमनसां, न चलति, पुंसां युगान्तेऽपि ॥ २८२

तथा -

मार्तण्डान्वयजन्मना क्षितिभृता चाण्डाल-सेवा कृता,
रामेणाद्भुत-विक्रमेण सहसा संसेविताः कन्दराः ।
भीमाद्यैः शशि-वंशजैर्नृपवरैर्दास्यं कृतं रङ्कवत्,
स्वां भाषां प्रतिपालनाय पुरुषैः किं किं न चाङ्गीकृतम् ॥ २८३

ततो राज्ञाऽनुज्ञातः सन् श्रेष्ठी स्वस्थाने प्राप्तः । कुमार स्तलारं प्रत्याह-भोस्तव राज्ञो य आदेशो भवति तं शीघ्रं कुरु । मम पश्चाद्वतं विलोक्यत उक्तवेलोपरि । लोका हसन्तिय-अहो चौरस्योक्तवेलोपरि गृहे गमनेच्छा समस्ति । ततो राजादेशात् सदयेन सह युद्धे जायमाने बहु-जन-क्षयं दृष्ट्वा राजा चिन्तयति मम जन-क्षयो भवति, एतस्य चौरस्य तु चित्त-संक्षोभो मनागपि न भवति । अस्य च्छोतिका-पाटनमपि न भवदस्ति अतो मम द्वि-पञ्चाशतं वीरानुत्थाययामि तेषां वीराणामद्याऽपि निद्राऽपि x x x नास्ति । ततस्ते ५२ वीरा राज्ञा युद्धाय प्रेरिताः । तै लग्ना योद्धुं । तैः सह सदयो युध्यति । परं ते द्विपञ्चाशत् तैः स एकोऽपि न पराजीयते । ततोऽवलोकक-लोकाश्चमत्कृता वदन्ति -

x x x सुहघरि महिला यह, कुट्टणि को न समत्थ ।
समरंगणि भड-संमुहा, विरला वाहइ हत्थ ॥ २८४

इतश्च कोऽपि विद्यासिद्धोऽभिनव-नारद-तुल्यो युद्ध-रस कौतुकी तत्राऽऽगाद् युद्ध-विलोकनाय । कुमार-पार्श्व एक एव कुमारो योद्धा नाऽपरः । तेन युद्ध-विलोकन-रसस्तस्य न पूर्यते । कुमार-पार्श्वेऽपि बहवो भवन्ति तदा वरमिति विचार्य कुमार-पार्श्व आगत्य पृच्छति-भौ महा-सुभट तव पक्षे कोऽपि साहाय्यकर्ता न दृश्यते । किं नास्ति तादृशः कोऽपि शूरो किं करोति ।

यतः -

असहायः समर्थोऽपि, तेजस्वी किं करिष्यति ।
निर्वाते पतितो वह्निः स्वयमेव प्रशाम्यति ॥ २८५

कुमारो वक्ति-मम पञ्च वीराः साहाय्य-कर्तारः सन्ति धनद-गिरि-गुफायां वसन्तः । परं मम केषांचिदपि साहय्यं विलोक्य ततः स नारदवत् कौतुकी तत्र गिरौ गत्वा प्रोचितवान तत्पुरोभो वीरा युष्माकं कञ्चुक-प्रदान-पन्थेन मित्रस्य शूलीभेदो भव-न्नस्ति प्रतिष्ठानपुरे। भवद्भिर्यात् किमपि चलति तत्कुरुत । सम्प्रति भवतामवसरः ।

यतः -

विणए सिस्स परिक्खा, सुहड-परिक्खा य होइ संगामे ।
वसणे मित्त-परिक्खा, दाण-परिक्खा य दुक्काले ॥ २८६
मित्ताणममित्ताण वि, नज्जइ विहुरे जहट्ठिअं तत्तं ।
सत्थावत्थे समए, धणीण मित्तं जयं सयलं ॥ २८७
जानीयात् प्रेषणो भृत्यान्, बान्धवान् व्यसनागमे ।
मित्रमापदि काले च, भार्यां च विभव-क्षये ॥ २८८

तच्छ्रुत्वा पञ्चापि वीरा अधावन् तत्साहाय्याय । अजा X X X X श्वमश्वेन रथं रथेन गजं गजेनाहत्याहत्या-मर्दयत् । शूलीपाषाणवर्षणं करोति । शिलाघातेन कटकं चूर्णयति । शेवालः शीतज्वरं करोति । तज्जाड्येन कम्पित-शरीराः पदमपि चलितुंन शक्नुवन्ति । घोरान्धकारो मध्या-ह्नेऽपि । अन्धकार-करणादन्धानिवाऽकरोच्चमूभटान् । ततो विलोकक-नगरलोकास्ते नश्यन्ति पतन्ति च पुरमपि क्षुब्धम् । हरसिद्धि-प्रभावाद् द्विपञ्चाशदपि वीरा भग्ना । वीराणामुत्तारितं नीरं तेन । ततः स्व-बलं भग्नं नश्यश्च दृष्ट्वा सालवाहन-नृपश्चिन्तयति -

सङ्ग्रामे सुभटानां तु, कवीनां कवि-मण्डले ।
दीप्तिर्वा दीप्ति-हानिर्वा, मुहूर्तादेव जायते ॥ २८९

तथा मम बलं पुरा केनाऽपि भग्नं नाऽभूदिदानीं तु ५२ वीरयुतं सर्वप्रकारेण भग्नमिति चिन्ताकुलचेता इतस्ततो विलाकयन्नस्थात् ।

यतः -

थल-बल-सिद्धि-बुद्धि जो जाणइ, ताण विन्नाण बहुल वक्खाणइ ।
हय-गय-नर-नरिंद जो वाहइ, पडिओ विनाणी सो टगमग चाहइ ॥२९०

ततोऽस्य कुमारस्यापूर्व-रूप-लावण्यलक्षण-पराक्रमादि दृष्ट्वाऽचिन्तयत्-ना यं चौरो न च सामान्य-मानवो वा । किन्तु कोऽपि वीरेभ्योऽधिको वाऽऽराधित-वीरो यद्वा देवो विधाधरो वा सम्भाव्यते । तस्मादनेन सह युद्ध-करणं न श्रेयस्करम् । अथेतो राजा युद्धं निषेधयामास । प्रोक्तं च भूमिवल्लभेन-भो वीर त्वमात्मानं प्रकाशय । स न प्रकाशयति स्वम्-ततो नृपः कामसेनामाकार्य पृच्छति-हे कामसेने अयं नरस्तव गृहे कतिभ्यो दिनेभ्यो यावत् तिष्ठति किमप्यस्य कुल-गोत्र-नाम-स्थानादिकं त्वया ज्ञायते । सा प्राह-देव गृहे मम चत्वारि दिनानि स्थितः । अस्य कुलगोत्रादिकं तु न वेद्मि । परमस्यासिर्नामाङ्कितो मम गृहेऽस्ति । राज्ञा स आनायितो विलोकितश्च । तदा तत्र सुवर्णाक्षरैः सदयवत्स-कुमारस्य खड्गमिति लिखितं दृष्टम् ।

राज्ञा प्रोक्तं-भो अनेनाभिज्ञानेन त्वं सदयवत्सोऽसि । मन्य स्व मा वेति । कुमारोऽब्रवीद्-अहो वचन-चातुरी वरीयसी । क्व सालवाधीशसुतः क्वाहमेकाकी चौरो वीरः । राजाऽऽह-भोस्तवासि-पट्टि कायां सदयवत्सस्य नामास्ति । सदयो ब्रूते-तत् सत्यम् खड्गं सदयवत्सस्य

मयोज्जयिनी-गतेन स्व-द्यूत-कलया तद्धस्तगतमेतज्जित्वा गृहीतम् । तेन हेतुना तन्नामात्र । राजाऽवद-मंत्र्यादीनां पुरः-पृथिव्यां स कोऽपि नास्ति यः सदयं छलेन बलेन कलया वा निर्जित्य तस्यासिं गृह्णाति सिंह-केसर-सत्प्रभा रविमिव । परमेष एव सः । परमेष स्वं न मन्यमानोऽस्ति । तस्यात्र श्वशुर-वर्गस्य सद्भावाल्लज्जादिकारणैः स्वमपलपति । अन्यस्येदृशी शक्तिः क्व यया ५२ वीरा जीयन्ते । परं पितुः कोपदिकारणै X X X पमानः । स एषोत्रागात् ।

यतः -

त्रयः स्थानं न मुञ्चन्ति, काकाः कापुरुषा मृगाः ।
अपमाने त्रयो यान्ति, सिंहाः सत्पुरुषा गजाः ।। २९१

मन्त्र्यादय प्रोचुः-दैव सत्यमेवं सम्भाव्यते । ततो राजा जगाद-सा कापि बुद्धिरस्ति यया कथमपि जीवन्नेष ध्रियते युद्धं विना यच्चकरणे नानर्थः ।

यतः -

महा-नदी-प्रतरणं, महा-पुरुष-विग्रहम् ।
महा-जन-विरोधं च, दूरतः परिवर्जयेत् ।। २९२

तथा -

अफलानि दुरन्तानि, सम-व्यय-फलानि च ।
अशक्यानि च कार्याणि, नैव कुर्याद् विचक्षणः ।। २९३

तदा मुख्य-मन्त्र्यवोचत्-प्राध्वरं सुकरमेतद्धरणं देव । गजानामग्रे कः सबलो

यतः -

स धनी यस्य भूभागो, यस्याश्वास्तस्य मेदिनी ।
स जयी यस्य मातङ्गा यस्य दुर्गः स दुर्जयः ।। २९४

जयत्येकोऽपि-गजोऽत्र, वाजि-लक्ष-चतुष्टयम् ।
तस्माद् गजा दले यस्य, तस्य हारिः कथं भवेत् ।। २९५

ततः सर्वान् हस्तिन आनाय्य कुम्भि-कुम्भ-शूलेन मेलयित्वा हस्ति-घटा-मध्य-प्राकारे प्रक्षिप्य ध्रियते । इति मन्त्रिणोक्ते राज्ञाऽनुज्ञातं वरं वरमिति । आनीता गज-घटाः । वेष्टितोऽसौ । गजघटाः शनैः शनैरासन्ना विधीयन्ते हस्तिपकैः । कुमारः सङ्कीर्णेपपात । दृष्टा नृपादयो वदन्ति-भोः क्वयास्यसि सम्प्रति सङ्कीर्णे पतितः । ततो हसित्वा सदयः सिंह-नादं तथाऽकरोद्यथा त्रस्ता गजा दिगन्तं प्रापुः । अङ्कुशैस्ताडिता अपि न सम्मुखा बभूव । येषां गजानां बलेनास्य धरणी विषये महानूष्मा नूनं तेषामपि तेजो हतम् । अजा-वृन्द मिव नंष्ट्वा दिगन्तं

गता अमी। इति चिन्तयते राज्ञे विज्ञप्तं सर्वैः-देव नायं धर्तुं शक्यते कैरपि प्रकारैः। ततश्चम-त्कृतमना नृप आयुध-सन्नाह x x x टोप-गजादींस्त्यक्त्वा पाद-चारेण तत्सम्मुखमागात्। ततः कुमारोऽपि तं तथाऽऽगच्छन्तं दृष्ट्वा सम्मुखं गत्वा प्रणाममकरोत्। नहि सुकुलोद्भवा विनय-क्रियातो भ्रश्यन्ति। राज्ञा सस्नेहमा लिङ्गितः। नृपस्तं पराक्रमादिभिः सदयवत्सं ज्ञात्वा हृष्टो बहुमानपूर्वं स्वागतोदन्तमपृच्छत्। दृष्ट-तादृक्-पराक्रमेण चमत्कृताः पौर-लोकाः परस्परं जल्पन्ति-नासौ पूर्वमेवामानं प्रकटीचक्रे पराक्रम-मुखेन स्वं प्रकाशयामास। युक्तं चैतत् -

अकृत्वा पौरुषं या श्रीर्विकाशिन्याऽपि किं तया।
जरद्गवोऽपि वाऽश्नाति, दैवाद्भूमिगतं तृणम्॥ २९६

राज्ञा पृष्टम् लोप्त्र-कञ्चुकाङ्गीकरणाद् युद्ध करणत्वादेकाकि त्वत्-स्वरूपम्। प्रालपत् सदयो वीरपञ्चकार्पितकञ्चुकस्वरूपं हस्ति - वध-मन्त्रि-प्रेरित-राज-कोप-भवनादिस्वरूपं च। तच्छ्रुत्वा नृपोऽजल्पद्-अहो पितुः स्नेहो लोक-वचनैः पुत्रस्य देशनिष्कासनं करोति कथम्। कुमारो जगाद-पितुः किं दूषणम्। कर्मण एव दूषणम् -

यतः -

अस्ति बुद्धिः परेषां हि, x x x वर्तते क्वचित्।
शक्रोऽपि कोपितं कर्म, नैव सान्त्वयितुं पटुः॥ २९७

प्रददात्युत्सवे शोकं, शोके सम्मद-सम्पदम्।
अन्यथा विदधत् सर्वं, बलीयः कर्म केवलम्॥ २९८

अवश्यंभावि-भावनां, प्रतीकारो भवेद्यदि।
तदा दुःखैर्न बाध्यन्ते, नलराज-युधिष्ठिराः॥ २९९

राजाऽप्याह - एतत् सत्यमेव प्रागर्जितं को लङ्घयति। यतः -

लक्ष्मीर्माता पिता विष्णुः, स्वयं च विषमायुधः।
तथापि शम्भुना दग्धः, प्राकृतं केन लङ्घ्यते॥ ३००

उअणं भुवणक्कमणं, अत्थमणं तह य एग-दिवसम्मि।
सूरस्स वि तिन्नि दसा, का गणणा इयर-लोयस्य॥ ३०१

दुष्ट-मन्त्रिणः कीदृक् कथनम्। परे प्रोचुर्देव खला एवंविधा एव।

यतः -

सर्पः क्रूरो हि जीवेषु, सर्पात् क्रूरतरः खलः।
मन्त्रोषध-वशात् सर्पः, खलः केनोपशाम्यते॥ ३०२

मम सुता क्वास्तीति नृपेण पृष्टे कुमारेणोक्तम्-आसन्न ग्रामे भट्ट-गृहे । राजा सुखासन-प्रेषण-पूर्वं तदानयनाय शक्ति-सिंह सुतं प्रेषयति । स तत्र गत्वा स्वभगिनीं ननाम। तदा साऽजरामरो भूया इत्याशिषं ददौ । सोऽपि हसित्वा प्राह-यदि भवत्-पत्युः पुरतश्छुटिताः स्म तदाऽजरामरा एव जाताः स्म । तयाऽपि पृष्टं-कथं । तेन युद्ध-स्वरूपं प्रोक्तम् । ततः सदयवत्स-सहितां तां प्रौढ-महेन स्व-सौधे नयति राजा । कुमारः सभार्यस्तत्र सुखेन तिष्ठति। वर्षा-चतुर्मासीं स्थितो द्यूतार्जितेन धनेन स्वगृहं पूरयति प्रत्यहम् । परं श्वशुर-गृहे स्थितस्य तस्य न रतिर्लज्जा-परवशतादि-हेतुभिः । तथा चोक्तं -

शिरसा धार्यमाणोऽपि, सोमः सौम्येन शम्भुना ।
तथापि कृशतां याति, कष्टं खलु पराश्रयः ॥ ३०३

कदाचिन्मनो-विनोदाय विद्वद्-गोष्ठि-सुख-लीनो दिनान्य-तिवाहयति रसावेश-हृद-निमग्न-चितः । यतः -

सङ्गीतं सुकविवचस्ताम्बूलं प्रिय-जनस्य सन्देशः ।
सुचरित्रमित्रगोष्ठी, नव-नव-रस-युक्तयः षडिमाः ॥ ३०४

अन्यदाऽसौ श्लोक-द्वयमश्रौषीद्यथा -

मित्रवान् साधयत्यर्थान्, दुःसाध्यानपि तद्युतः ।
तस्मान् मित्राणि कुर्वीत, समानान्यात्मनः खलु ॥ ३०५

आपन्-नाशाय विबुधैः, कर्तव्याः सुहृदोऽमलाः ।
न तरत्यापदुदक - सिन्धौ मित्रविवर्जितः ॥ ३०६

कुर्वीत बहुमित्राणि, सबलान्यबलानि वा ।
गज-यूथं वने बद्धं, मूषकेण विमोचितम् ॥ ३०७

### गज मूषक-कथा

गज-मूषक-कथा च श्रुता यथा - कस्मिन्नपि वन उन्दरेण गज-यूथेन सह मैत्री कृता। गजः प्राह त्वया किमुपक्रियते । उन्दर ऊचे कदा कस्मिन्नवसरे लघुनाऽपि कार्यसिद्धिः स्यात् ।

यतः-

असाध्यं गुरुभिः किञ्चित्, कार्यं कुर्याल्लघुः क्षणात् ।
रव्यसाध्यं तमो भूमि-गृहे-दीपः क्षेपन् न किम् ॥ ३०८

एवं प्रीतिर्जाता । गजस्यानुगमन-सम्मुख-गमनादि करोत्युन्दरः । एकदा कूट-

रचितखड्डायां पतितो गजो ना गच्छति । तदोन्दरोऽधृतिं करोति । गतो विलोकनार्थम् दृष्टो गजस्तथावस्थो। रोदिति मूषको। गजेनोचे-तव प्रीत्याः किं फलमुन्दर। ममाद्यैवावसरोऽस्ति। उन्दरो निज-जातिमा-कारितवान् । जाति-भक्तैस्तैः प्रोक्तम्-वयं न जाति-द्वेषक-श्वान इव । ततस्ते सर्वे मिलित्वा गतास्तत्र । पादैर्धूलिपटलं क्षिपन्ति गर्त्तायाम् रात्रि-चतुर्यामैः पूर्णा सा। निर्गतो गजराजी । लघवाऽप्यवसरे कार्यकराः । ततस्तेनैकं मित्रं कृत्वा वृद्धवाक्यम्-

शुश्राव

एकं मित्रममित्रेषु, चैकं सूनुमसूनुषु ।
एकं नेत्रमनेत्रेषु, जगुर्मित्राणि तत्कुरु ॥ ३०९

इत्येतद्विचार्य त्रीणि मित्राणि साहस-बल-सम्पन्नानि क्रियन्ते स्म । चतुर्धा मित्राणि। तेषु द्वयं प्रतिपत्तव्यं । तथा चोक्तम् -

त्यजेन्-माला-समं मित्रं, त्यजेन् मित्रं तुला-सभम् ।
न त्यजेन् मेघ-सदृशं, मही-तुल्यं च न त्यजेत् ॥ ३१०

केता मित्त जि कणय-सम्, कसिआरं गरहिंति ।
तावणि तोलपि घड-घडणि, छेदण न करंति ॥ ३११

इति परीक्ष्य च एको वणिग् द्वितीयो विप्रस्तृतीयः क्षत्रिय एते त्रयोऽपि सदयेन सह गच्छन्ति तिष्ठन्ति दिवानिशम् । धनैः पूर्णैः सदौदार्यगुणैश्च प्रख्यात-कीर्ति-पटले तस्मिन् को मित्रतां प्रतिपत्तुं सेवितुं वा नेच्छन्ति ।

यतः -

द्रविणैः कृपणोऽप्येति,सेव्यतां महतामपि ।
सेव्यः स्वर्णाद्रिरुन्निद्रैः, किं सदैव न दैवतैः ॥ ३१२

तथा च -

सूरोऽपि मेरुं परितो भ्रमन् न स्वर्णस्य माषं लभते कदापि ।
तथाऽपि नो मुञ्चति तत्समीप-माशा मलिना खलु जन्तु-वर्गे ॥

किं पुनरुदारः तथा चोक्तं -

धनवान् स्थूल-लक्षो यः, स हि कैः कैर्न सेव्यते ।
जलैः पूर्ण स्तटाकोऽत्र, सेव्यते विश्व-जन्तुभिः ॥ ३१३

पुनरन्यदा द्यूत-स्थान-स्थितस्य सदयस्य कोऽपि वैदेशिको बहु-देश-भ्रमण-वीक्षित-नानाश्चर्य-सन्ततिः पुरुषोऽमिलत् । तं नवीनं दृष्ट्वा सदयः पृच्छति-कुत आगाद्भवान् । स नरो

वक्ति-तुम्ब वण-नगरादहमागां कुमार । तत्र पुर एको धनपतिर्व्यवहारी द्विधाऽपि हि यथार्थनामाऽस्ति । तस्य पिता वृद्धो मृतश्चिता-प्रज्वालितोऽपि प्रातह गृह-मध्ये तथैवागत्य-सुप्तः । पुनः प्रज्वालितः पुना रात्रौ तथैवाऽऽगत्य सुप्तः । एवं ज्वालितस्य तस्य गता-गतं कुर्वतो वर्षमेकं समजनि । न कोऽपि विद्या-मन्त्रोऽस्ति यस्तं प्रज्ज्वाल्य पश्चादागच्छन्तं निवारयति । इयमपूर्वा वार्ताऽदृष्ट-श्रुत-पूर्वा । ततः सर्वमनापृच्छ्य मित्र-त्रय-युत स्तत्र गतः कौतुकी xx-xx तत्र नगर-प्रवेशे 'भुक्त्वा न मध्ये गम्यते ' इति वृद्धानां बुद्धि हृदये निधाय क्वोऽपि भोजनाय धान्य-पाकं कारयन्ति । भुक्त्वा स्वस्थीभूताः । यतो भुक्त्यनन्तरमेव सर्वाणि कार्याणि स्मरण-पथमायान्ति ।

उक्तं च -

> भार्या-स्नेहः स्वर-विशद्ता बुद्धयः सौमनस्यं,
> प्राणोऽनङ्गः पवन-शमता दुःख-हानिर्विलासाः ।
> धर्मः शास्त्रं सुर-गुरु-नतिः शौचमाचार-चिन्ताः,
> शस्यैः पूर्णे जठर-पिठरे प्राणिनां सम्भवन्ति ॥ ३१४

तावता पटह-ध्वनिः कर्ण-पथमागाद् । भ्रमन्निति वदति-यो धनपति-व्यवहारिणः पितरं ज्वालयति तस्य स्वां सुतां लक्ष-सुवर्ण-युतां स ददाति । ततः सदयवत्स-कुमारेण पूर्व-ज्ञात-स्वरूपेण स्वमित्रं प्रेष्य पटह [स्पृष्टः] । ततो व्यवहारी बह्वर्त्तिभाक् तं समित्रं गृहे नयति । मार्गे गच्छन् कुमारो महत्कलकलं गणिकानां कारित-गान-ध्वनिं श्रुत्वा पृच्छति-किमत्र मण्डलं मण्डितमस्ति । व्यवहारी कथयति अस्यापि शङ्कर-विप्रस्य गृहे मद्वद् वर्षा-दिवस- प्रमाणमजनि मण्डलस्याऽस्य मण्डितस्य । कुमारोऽपृच्छत्-केन हेतुना । श्रेष्ठी वदति-अस्य विप्रस्य पुत्री सुन्दरी-नामधेयाऽति-सुरसुन्दरी-रूप सम्पद, नीलोत्पल-दल-दीर्घ-लोचना चन्द्र-मुखी बन्धूक कुसुमारक्त-कान्त-दन्तच्छदाऽस्ति । सा दुष्ट-सीकोतरी-गृहीता विविध चेष्टां करोति तन्मोचनायानेके महा-मन्त्रवादिनो भूयांसोऽपि प्रतीकारानकार्षुः । परं सा न मुञ्चति । कन्या न भुङ्क्ते न शेते खट्वायामुपविश्य तिष्ठति । रक्तलोचनैः सर्वान् भापयति । प्रत्यहं गानमेकं च कारयति । यदि गायनं न कारयन्ति तदा भृकुटिं कृत्वा पित्रादीनां ब्रूते-रे ममाऽग्रे गानं न कारयिष्यथ तदा सर्वान् सम्मर्द्य मारयिष्यामि । तेनावर्षादत्रेत्थं गानमेकं भवदस्ति । स विप्रोऽपि पटहेन वक्ति-यो मम पुत्रीं सज्जीकरोति तस्यैतां स्वर्ण-लक्षेण सह ददामि । परं न कोऽपि सज्जयति । व्यवहारिमुखाच्छ्रुत्वा कुमारोऽवदत्-तवगृहे पश्चाद्वंस्यते । प्रथममस्य गृहे गत्वा सी कोत्तरी मोच्यते । व्यवहारी जगाद-भोः क्व यास्यसि । तव कोऽत्र प्रतापे अनेकैर्महा-मन्त्र-ज्ञैरेषाऽ साध्य-प्रतिक्रियेति कृत्वां मुक्ता । कुमारोऽवदद्-अस्तवेवम् परं मूषकोऽपि पोट्टलिक-मध्ये गण्यते कदाचित्: । अतः कौतुकं विलोक्य गम्यते । गतस्तत्र हरसिद्धिं मनसि संस्मृत्य । यावद् बाह्मण-पुत्र्या स आगच्छन्

दृष्टस्तावद्धर सिद्धि-प्रभावतस्तद्गतं तेजः सोढुमशक्तया तया भय-भीतया शीघ्रं पल्यङ्कादुत्थाय X X X X कुमार-पादयोः पतित्वा प्रणतम्। स प्राह-रे दुष्टे! ब्रह्म-सुत - व्रत-हत्याकारिणि चाण्डालि अस्पर्श्ये मा मां स्पृश। दूरे भव। इत्युदित्वा गले धृत्वा भित्त्या सह पश्चादाच्छोटिता। पुनरुत्थाय प्राह-तव दास्यस्मि। मा मां मारय। कुमारो जल्पति-रे वर्षं यावत् त्वयेयं रुद्धा किलिता च कृतेयं पीड्यमानाऽस्ति। अस्या भोगास्त्याजिता। ब्राह्मणकुटुम्बं पीड्यमानं दृष्ट्वा तव हृदये करुणालवोऽपि नोत्पद्यते। दुराचारिणि, त्वं मारणार्हाऽसि। मुञ्चैनाम्। नोचेन तदा हरसिद्धैर्वीर - दत्तया क्षुरिकया तव नाशां कर्णौ च छेत्स्यामि। ततो भीता प्राह-सीकोत्तरी-मुञ्चामि मुञ्चाम्येनाम् यास्यामि। मुक्ता मया। इति वाचं दत्त्वा गता नंष्ट्वैकक्षणभात्रेण। ततो ब्राह्मण-पुत्री सज्जा बभूव। उत्थापितं मण्डलम्। विसर्जिता गायनाः। बाला स्नापयित्वा भोजनं कारिता। ब्राह्मणकुटुम्बं प्रमुदितम्। सर्वेषामाधिर्भग्नोः। विप्रौघ स्तं कुमारं स्तौति-

अद्य मे सुबहोः कालात् श्लाघनीयमभुदिदम्।<br>
त्वत्-पाद-पद्म-सत्-स्पर्श-सम्पन्नानुग्रहं गृहम्॥ ३१५

पुत्री तदैव कुमारस्य दत्ता पित्रा। तेन स्वमित्राय ब्राह्मणाय परिणायिता। विप्रेण लक्षस्वर्णं दत्तम्। व्यवहारी चित्ते चमच्चक्रे। ततस्तं स्वगृहे नयति। दर्शितश्च स्वपिता गृह-मध्ये मृतकरूपः। कुमारेणोक्तम्-यदि प्रज्वाल्यते तदा किं लभ्येते। श्रेष्ठी प्रोचे-प्रज्वालनेन किं बहुभिरप्यग्रे प्रज्वालितः। त्वं यदि प्रज्वालयसि पश्चाच्चेन्नागमिष्यत्ययं तदा द्विलक्षी सुवर्णस्य स्वां च कन्यां ददे। कुमारेणोक्तम्-एवं भवंतु। ततः पाश्चात्य-प्रहरार्धेऽवशेष-दिने तच्छवं लात्वा मित्र-त्रय-युतो गच्छन्नुवाच-भो श्रेष्ठि-पुङ्गव तव पितुः कर्पूरागुरू-चन्दनादिकमन्तिमं भोगं xxx xx कुमार ऊचे-तेषां ज्वालकानां सदृशो नाहम्। श्रेष्ठिना मानिता भोगाः। कथमपि प्रज्वाल्य पश्चादागच्छन्तं वारय। कुमार एवमस्तु। ततस्ते गताश्चत्वारोऽपि शमशानभुवि। तावता सन्ध्याऽपतत्। कुमारो मित्र-त्रयमाह- रात्रौ व्यन्तरादयः प्रबला भवन्ति। एष तु व्यन्तराधिष्ठितोऽस्ति। तेनाधुनाऽस्य प्रज्वालने नाऽस्ति युक्तिः। ततोऽत्रैवैनं मुक्त्वा प्रतिप्रहरं जागृमः अन्यथैषोऽस्मां-श्चतुरोऽपि। वञ्चयित्वा पूर्ववत् पश्चाद्यास्यति। ततो मित्रैरुक्तम्-एवं भवतु। तथा कृते प्रथमं वणिग् जागर्ति। शेषाः सुप्ताः तदा दूरे स्त्री-रोदनं श्रुत्वा स चिन्तयति-का स्त्री श्मशानेऽत्ररोदिति। गत्वा विलोकयामि। उत्थितः सन् चिन्तयति-मृतकं शून्यं मुक्तं पश्चाद् यास्यतीति स्व पृष्ठे बद्ध्वा जगाम। तत्र गतः शूली-प्रोतमेकं चौरं पश्यति। तत्पार्श्वे स्त्र्युपविष्टाऽस्ति। तस्य हस्ते घेबरादि दृष्ट्वा स पृच्छति-का त्वम्। किं रोदिषि देवकि। सा प्राह-भोः साहसिक मम पतिरेष शुल्यग्रे जीवन्नस्ति। अहं स्नेह-पाशादस्य भोजन-दानायागताऽस्मि। परं किं कुर्व एष उच्चो न प्राप्नोमि। स दयावानाह-मम स्कन्धे चटित्वा भोजय। सा तथा करोति। तदा मांस-खण्ड मेकं तस्य स्कन्धेऽपतंत। स ऊर्ध्वं पश्यति। तावता सा चौर-देह-मांस-खण्डानि च्छेदं

छेदं खादति। ततो रुष्टोऽसौ तां भूमावाहन्ति। ततो नश्यन्त्यास्तस्याः करोऽसिना छित्त्वा पातितः। स करं विलोकते। तदा स्वर्ण-चुडि-कङ्कण-रत्नाभरण-भूषितं तं दृष्ट्वा चिन्तयति-कस्याऽपि महर्द्धिकस्यैषा स्त्री। तं करं वालुकान्तः संगोप्य पश्चादागत्य स्थितः स्वस्थाने। एतावता प्रथम-प्रहरकोऽभूत्। ततो द्वितीय-प्रहरे विप्रो जागर्ति। तावदेको राक्षसः श्याम-देहः सप्त-तालवदुच्चस्तस्याऽग्रे भूत्वा पुरं प्रति याति। तेनाचिन्ति-क्व यात्येष राक्षसो विलोकयामि। ततः स प्राग्वन् मृतकं पृष्ठे बद्ध्वा कृत-सुदृढ-परिकर-स्कन्धोऽनुययौः। साहसिकाः किं न कुर्वन्ति। स राक्षसो राज-मन्दिरं गत्वा राज्ञः सुतामादाय शीघ्रमेव पश्चाद्वलितो। विप्रोऽपि तस्यानुपदं वलितः। राक्षसस्तां कन्यां सर्वतो गुफायां मुक्त्वा तस्या अग्रे गुफा द्वारच्छेदेऽस्थात्। चाटु वचनैस्तामर्थयति रागान्धः। सा नानुमन्यते कथमपि। ततो रुष्टो राक्षसो वदति-रे दुष्टे मां नमन्यसे तदा स्मर तव रक्षकंम्। तव मस्तकं छेत्स्यामि। तावता स विप्रोऽपि राक्षस-पृष्ठे प्रच्छन्न-स्थितो विलोकयन्नस्ति। राजसुता सम्मुखस्था तं पश्यति। राक्षसस्तं पृष्ठस्थं न पश्यति। ततो राजकुमार्योक्तम्-आत्मभ्यां यस्तृतीयः स मम शरणम्। तयेत्युक्ते यावत् स राक्षसः पश्चाद् विलोकते तावत् पृष्ठस्थेन विप्रेणासि घातेन द्विधा कृतोऽसौ मृतः। स्वस्थाऽभूद राज-सुता। ततो विप्रेण पृष्ट्वा सा-का त्वं। कस्य सुता। सा प्राह-अहमस्य पुरस्य नृपस्य विक्रमसेननाम्नः सुता लीलादेवीनाम्नी। ततः सन्धीर्य तां तत्स्थाने नीत्वा मुमोच। स पश्चादागत्य स्थितो मित्रपार्श्वे। एतावता द्वितीय-प्रहरोऽगात्। तृतीय-प्रहरे क्षत्रियो जागर्ति। शेषास्त्रयः सुप्ताः सन्ति। तस्य प्रहरकेऽग्निर्निर्वाणः। ततोऽनेन चिन्तितम्-यद्यग्निर्विध्यात स्तदा प्रभातेऽस्य मृतकस्य कृतेऽग्निरत्र कुत आनयिष्यते। अतोऽधुनैवानयामि इति विमृश्येतस्ततो विलोकते तावद्दूरेऽग्निं प्रज्वलन्तं पश्यति। ततः पूर्ववत् सोऽपि मृतकं पृष्ठे बद्ध्वा तत्र याति। तदा तत्र बहवो भूता मिलित्वा चुल्हकोपरि प्रौढ-गोलके क्षिप्रचटं रन्धयन्ति। त सर्वे परित उपविष्टाः सन्ति। अन्यत्र द्वाविंशति-पुरुषा रज्जुभिर्बद्ध्वा मुक्ताः सन्ति। ते पीडया करुण-स्वरं रणन्ति। ततः स क्षत्रियः साहसवान् तस्मादेव चुल्हकादुल्मुकं लात्वा तान्भूतान् प्रति धावितः। ततो नष्टास्ते सर्वेऽपि भूताः। साहसिकं प्रति कः प्रतिहर्तुं समर्थः

यतः -

उद्यमं साहसं धैर्यं, बलं बुद्धिः पराक्रमः।
षडेते यस्य विद्यन्ते, तस्य देवोऽपि शङ्कते ॥ ३१६

क्षिप्रचर-गोलकं बभञ्ज। ते पुरुषाः सर्वेऽपि च्छोटिता हृष्टा। पृष्टास्तेन-भोः कुमारकाः-के यूयं। कुतो बन्धिताः तेऽप्यूचुर्-वयं सर्वेऽप्यत्र राज्ञः सुता एतैर्भूतैः पापैरत्र भोजन-मध्येऽस्मान् शाक-पदे कर्तुं वयं बन्धित्वा मुक्ता अभूम। अधुना त्वया बन्धनान्मोचिताः। अतः परं जीव्यते स तव प्रसादः। इति वदन्तस्ते। नगर-बहिः-प्रासादे स्थापयित्वा मुक्तास्तेन।

स्वय- मग्नि गृहीत्वा स्वस्थाने गतः । ते त्रयोऽपि परस्परं स्व-स्व-प्रहर-विहितं कृत्यं नाकथयन् । तृतीय प्रहरोऽभूत । चतुर्थ-प्रहरे सदयवत्सोऽस्थात् । तदा मृतकमुत्थाय सदयमाह- भोः पुरुष द्यूतेन रम्यते । सदयः प्राह-अहो वेताल मम-प्रतिज्ञाऽस्तियः सङ्ग्रामाया थवा घूताय प्रार्थयति तस्य मया तद्दातव्यमेवेति । तेन मया रम्यते । पर मत्र सार-पाशक-सारपट्टादि न किमपि । ततः कथं रम्यते ? तदा मृतकेनोक्तं मां मुञ्च यथैतत्सर्वं गृहीत्वागच्छामि । कुमारेणोक्तं कौतुकवता-एवं कुरु । ततो मृतकस्थेन वेताल एव मदन्नस्ति(?) प्रश्चाद्गमने प्रज्वलनादि च करोति तदपि वेतालविलसितमेव । अत एष एव निगृह्यते तदा वरमिति विचार्याऽऽह - भो गुह्यक् रम्यते । परं पण-मोचन--योग्यं वस्तु नास्ति मम पार्श्वे । वेतालो ब्रूते-तवासिरस्तु पणे कुमार ।

प्रज्वाल्य तन्मृतकम्-स प्राह-तत्प्रज्वालितं ह्वी वेलाऽभूत । तेऽप्याहुः-वयं किं नोत्थापिताः । कुमारो वक्ति- इयति कार्ये बहुभिर्जनैः किं क्रियते । ततः स्नानादिना पवित्रीभूय रात्रिवृत्तं स्व-स्व-कृतं परस्परं कथयन्तस्ते श्रेष्ठि-गृहं जग्मुः । प्रोक्तं च तैः श्रेष्ठिवर देह्यस्माकं स्वकन्यां स-स्वर्ण-लक्ष-द्वयीम् । श्रेष्ठि-श्रेष्ठोऽजल्यत्-एवमेवं चेत्समर्पयामि । तदा न ज्ञायते किं यद् भवतां कन्या-सहिता द्विलक्षी दत्ता भवति । यतः सर्वैरपीयदियत् कृतमयं त्वधुनैवाऽगत्य गृह-मध्ये स्वपिष्यति । ज्ञास्यते कल्य एव । कुमारोऽकथयदियन्ति दिनानि यदागत स्तदेव स्मरेर्नातः परं तस्या गमनं विलोकयेः । श्रेष्ठी प्रोचे-पूर्वैरप्येवमेव प्रोचै । तथाप्यागच्छन् स्थितः तेन देयं श्वरेव दास्ये । ते सर्वे वदन्ति-श्वः कस्य दास्यसि ? वयं तु पान्थाः । अद्यैव न ज्ञायतेऽस्माकं कुत्र वासो भविष्यति । मार्गे गच्छद्भिरेतदल्पकार्यं विहितम् । ततोऽधुनैव देहि । श्रेष्ठी वक्त्यि एवं बलात्कारेण ग्रहीष्यथ तदा गृहणीथ गृहान्तर्गतमधुनैव । इति वदतां तेषां कलहोऽजनि । श्रेष्ठी राज्ञः पार्श्वे गतोः ।

यतः -

दुर्बलानामनाथानां, महा-कलह-कारिणाम् ।
उपद्रुतानां स्तेनाद्यैः, सर्वेषां पार्थिवो गतिः ।। ३१७

प्रोक्तं स्वरूपं ज्वालनस्य । बहुभिरप्येवं कृते मम पिताऽऽगच्छत्येव । एतैरद्य ज्वालितोऽद्यैव मार्गयन्ति । कल्पे चेन्नाऽऽगमिष्यति तदोक्तं देयं दास्ये । राजाऽऽह-भोः पान्था युक्तं वदत्येष, श्रेष्ठी । कुमार आह-देव ! पूर्व-ज्वालक-सदृशो नाहम् । राज्ञोक्तम्-तव ज्वालने कोऽप्यपूर्वः प्रकारः । स आहो-अपूर्व एव । राज्ञा कौतुकिना पृष्टम् । तव ज्वालयतः किमपूर्वं जातम् । अथ तैश्चतुर्भिश्चतुः-प्रहर-भवं स्वं स्वं कृतं चोक्तम् । ततो राजाऽऽह-न भवतां वचनमात्रेण प्रत्येमि

यतः -

अभिनव-सेवक-वचनैः, प्राघुणकोक्तैर्विलासिनी-रुदितैः ।
धूर्त-जन-वचन-निकरैरिह कश्चिदवञ्चितो नास्ति ॥ ३१८

यदि किमपि तदभिसद्भावाज्ज्ञानं दर्शयथ तदा सत्यं मेने । ततः प्रथम-प्रहर-जागर्ता वणिक् करं सुवर्ण-कङ्कण-चूडि-युतं समानीय राज्ञे दर्शितवान् । राज्ञा तं करमुपलक्ष्य प्रोचे-अयं करो मम पट्टराज्ञी-सत्को मत्कारिताभरणसद्भावात् । ततोऽतीक्ष्मद्धानः पृथ्वीपतिस्तां राज्ञीमाकारयति दासीः प्रेष्य । ताः शीघ्रमागत्य प्रोचुरदेव ! राज्ञी नास्ति । राजा चमत्कृतः । सर्वत्र शोधयामास । परं न लब्धा राज्ञी । चिन्तयति च नृपः-अहो मम राज्ञ्येवं विधा सीकोत्तर्यभूत् तद वरं जातं यदनया वयं न भक्षिताः । ईदृशी यदि गता तदा गच्छतु । स्त्रीणां चरित्रं को वेद ।

यतः -

रवि-चरियं गह-चरियं, च राहु-चरियं च X X X ।
जाणंति बुद्धिमंता, महिला-चरियं न-याणंति ॥ ३१९

विहि-विलसियाण खल-भासियाण तह कूड-महिल-चरियाणं ।
मण-चिंतियाण पारं, जाणइ जइ होइ सव्वन्नू ॥ ३२०

अत्र मन्त्र्युवाच-देव, प्राक्तनवृद्धैरुक्तं -

किं गहनं स्त्रीचरितं, कश्चतुरो यो न खण्डितस्तेन ।

इति ।

[स्त्री चरित-विषय आख्यानम्]

अत्राख्यानं, यथा श्रीपुरे श्रीपति-श्रेष्ठी । कस्मिश्चन् नर-कपाले-'अयं जीवन् शत-मारी मृतस्त्वेकोत्तर-शत-मारी' इति विधि-लिखिता लिपि दृष्ट्या वाचिता च दिव्यानुभावेन। तज्ज्ञान-कौतुकिना तेन पट्टकूल-वेष्टितं कृत्वा करण्डके क्षिप्तम् । गृह आनीय । भार्यायाः प्रोक्तम्-करण्डिका नोद्धारनीयेति । रक्षतां रह इति । तयोद्धाट्य विलोकितं च नूनं काऽपि स्त्री परिणीता आसीत्तस्या मस्तकं मोहेन X X X X अतिकोपाच्चुल्हके ज्वालयित्वा तस्य रक्षा पयोमध्ये क्षिप्त्वा पीता । पुरा गर्भ-सद्भावा तस्य परिणमितो गर्भस्तद्रसभावितोऽभूत । कालेन पुत्रो जातः । यौवने बालादिसार्थो विदेशे चलितः । कनकपुरे प्राप । तत्र पटहो वाद्यमानो दृष्टस्तेन । व्यतिकरं पृष्ट्वा स्पृष्टः । व्यतिकरस्त्वेवम्-एकदाऽत्रराज्ञोऽग्रे जीवन् महामत्स्यः केनापि प्राभृतीकृतः । राज्ञाऽन्तःपुरेऽप्रैषि । राज्ञीभिः प्रोक्तम्-अत्र पुरुष-नाम्ना सचेतनोऽचेतनोवा प्रवेशं

न लभत एकं नृपं विना। तदस्माभिः पश्चात् प्रेषितो मत्स्यः। राज्ञोऽग्रे मुक्तो। दासीभी राज्ञा पृष्टम्-किं पश्चादानीतो। दास्यः प्राहुर-देव राज्ञ्यः पतिव्रताः पर-पुरुषं स्पृशन्त्यपि न। एतावता मत्स्याऽट्ट-हास्येन हसति स्म। भयाच्चकितेन राज्ञा बहु-श्रुतः पृष्टः। प्राह सः -

देव गृह्णन्ति कार्यस्य, ये पारं पुरुषाधमाः।
ते सीदन्ति क्षणादेव, मूर्खौ द्विज-सुतौ यथा॥ ३२१

[मूर्खौ द्विज-सुतौ]

राजाऽऽह तत् कथं -

नन्दिग्रामे कश्चिद् विप्रस्य द्वौ सुतौ। एकदा ग्रामान्तरं गच्छन्ती नद्यां प्रवाहागतान् वटक-राशीन् भक्षयित्वा प्रमुदितौ। तत् सारस्यं वर्णयन्तौ तन्निर्णयार्थं तावनुनदीतटं गत्वा विलोकयन्तौ। अग्रे शूली-रोपित-पुरुष-रुधिर-बिन्दून् नीर-पतितान् वटकी भूय वहतो ददर्शतुः। ततः सञ्जात-शोकाश्चर्यौ केनापि प्रतिबोधितौ-भो अयं भाग्यवान्नरः स एवंविधावस्थायामपि परोपकारीति। ततस्तौ स्वं निन्दन्तौ नद्यां पतित्वा मृतौ। ततः कस्यापि कार्यस्य पर्यन्तो न ग्राह्य।

इत्यादि कथा न कैर्मासं यावत् प्रतारितो राजा तेन। रजा कदाग्रहं न मुञ्चति। तेनोक्तम् राजन् महाननर्थो भावी। राज्ञोक्तं तव न दोषः। ततस्तेन पाद-द्वयों-लङ्घ न-योग्या गर्ता खानिता। अतः परं सर्वमाकारितं तद्वचसा राज्ञा गर्ता-लङ्घ न आदिष्टं। उल्लङ्घिता गर्तैकोत्तरशत-स्त्रीभिः। तासु सप्त पुरुषाः स्त्री रूपधारिणः ९४ राज्ञ्यः। तेन पुरुषाः प्रकटीकृत्य दर्शिताः। सर्वे जनाश्चमत्कृताः। राज्ञा पृष्टं कथं ज्ञातः स्त्रीपुरुषविशेषः। तेनोक्तम् स्त्रीणां वामपाद् उत्पतति पुरुषाणां दक्षिणपादः। एतत्परीक्षातो मया ज्ञातो द्वयोर्विभागो। मत्स्यस्य हसनमतः कारणादेव। स्त्रीमाया गहनरूपा देवादीनामपि कौतुकप्रदा। तेन हेतुना व्यन्तरेण मत्स्य-मुखेऽवर्तीय हसितम्। तस्याऽर्धराज्यं दत्तं राज्ञा। १०१ राज्ञ्यः क्षिप्ता गर्तायाम्। वैराग्यात् तपोऽङ्गीकृतं राज्ञा। तस्य पित्रा तत्स्वरूपं स्व-पुत्र-विलसितं ज्ञात्वोक्तम् -

ललाट-लिखिता पुंसां, नैव दैवी लिपिर्वृथा।
एकोत्तर-शतं हन्तो-त्येषा शीर्षास्थिगा यथा॥ ३२२

एतत् क्व विप्रः पृष्टो वक्ति-स देव तव पुत्रीं समानीय पृच्छ। ततः सुतामाकार्य पृष्ठा। सा तं पुरुषं दृष्ट्वा सा प्राह-तात मम जीवितव्य-दातैष पुरुषः। राज्ञा पृष्टम् कथं। तदा सा राक्षस-सम्बन्धं प्रोचे। राज्ञा तज्ज्ञानाय गुफायां पुरुषाः प्रेषिताः। दृष्टः स राक्षसो द्विखण्डीकृतः पतितः। यथा-दृष्टं तै राज्ञे प्रोक्तम्। राजा हृष्ट आह-यस्य भयेन रात्रौ पुर-प्रतोली क्षणमात्रमुद्घाटिता न मुच्यते, लोका यद्भयेनैकाकिनो न निःसरन्ति तद्भयमेतेन निर्माशितम्।

लोका हृष्टाः प्रोचुः-एतेन लोकानां महानुपकारः कृतः । ततस्तृतीय-प्रहरयामिकः क्षत्रियः पृष्टः । सोऽप्यवादीद्-देव सुतानाह्वय पृच्छ । ततो राजकुमाराणामाकारणाय जनाः प्रेषिताः तेऽप्यागत्य प्राहुः-देव कुमारा द्वाविंशतिरपि न दृश्यन्ते । शोधिता अपि न लभ्यन्ते । ततस्तेनैव यामिकेनोक्तम्-नगर-प्रतोली-बहिःस्थ-प्रासादे सुप्ता सन्ति । तत्र गत्वा विलोकयन्ति तदा निद्राघूर्णिताः सुप्ता दृष्टाः । तत उत्थाप्य स्वपितुरग्र आनीताः पृष्टं च -वत्साः कथं प्रासादे यूयं सुप्ताः । ततस्तैस्तं पुरुषं दृष्ट्वा प्रोक्तम् । तात वयमनेन जीवन्तो मोचिता भूतेभ्यः । राज्ञोक्तम्-कथम् । तेऽपि भूतोपद्रव-स्वरूपं प्रोचुः । हृष्टो राजा पुत्री-पुत्र-जीवित-भवनात् । ततो राजा पृच्छति-राक्षसा देवयोनयः इति श्रूयते । तदा मानवैर्मारिताः कथं म्रियन्ते । भूताद्या अपि देवा एव न कावलिकाहाराः । तदा ते क्षिप्रचर-रन्धनं व्यञ्जनार्थं जन-हननं च कथं कुर्वन्ति । ततो जैनेन्द्र-वचन-श्रवणेनोद्धटित-हार्द-नेत्रा ज्ञात-सम्यग्-वस्तु-स्वरूपा मन्त्रिणः प्रोचुः-देव ये देव्योनयो राक्षसास्ते नरैर्मारिता अपि न म्रियन्ते । ये मानवा मांस-भक्ष-लोलुपा विविध-विद्याबलेन प्रौढ-प्रौढतर-रूप-करण-शक्तयः परं राक्षसीविद्या-साधन-योगाद राक्षसरूपधारणाच्च राक्षस-नाम-धारकास्ते मानवैर्मारिता म्रियन्ते नाऽन्ये । तथा भूतादीनां तु क्षिप्रचट-रन्धनं क्रीडा-मात्रं यतो व्यन्तराः कौतुक-प्रिया एव । श्रूयते च कौतुक-प्रियत्वं यथा -

श्रेष्ठ्युद्ग्राहणिकां कृत्वा रात्रौ रात्रौगृह-द्वार आगत्य निज-भगिनीं गुणश्री-नाम्नीं शब्देनाकार्य 'लेइ गुणसिरि गांठडी' इति भणति । एतदवसरे तद्गृहद्वाराग्रे महावृक्षे कोऽपि व्यन्तरो झोटीङ्ग वसति । तावता तेनैव गुणश्री रूपं विधाय पञ्च-शत-द्रम्म-ग्रन्थिं गृहीत्वा गतः । ततः श्रेष्ठी रात्रौ गृह आगात् भगिनीं पृच्छति-द्रम्म-ग्रन्थिं क्व? साऽऽह-कीदृग् ग्रन्थिः । स आह-सायं मया तव हस्तेऽर्पितिः । सा वक्ति-ममहस्ते केनापि किमप्यर्पितं नास्ति । स चिन्तयति-एषा मम गृहे धनिका नापलपति । परं गृह-द्वाराग्रस्थ-वृक्ष-वासि-झोटीङ्गेन च्छलितः । ततः साहसी नगरी-बहिः-श्मशाने गत्वा विलोकयति तावद् व्यन्तरभूताद्या बहवो मिलित्वा तामेव ग्रन्थिमुच्छाल्योच्छाल्य परस्परं करात्करे मुञ्चन्तः 'लेइ गुणसिरि गांठडी' इति वदन्तः कुण्डे भ्रमन्तः सन्ति । सोऽपि तन्मध्ये मिलित्वा रमते । ततः स्व-हस्ते ग्रन्थिं प्राप्य शनैर्गृहे आजगाम । तथा तुर्य-त्रिकान्वितं वानर-सङ्गीतं । उक्तं च -

असम्भाव्यं न कर्तव्यं, प्रत्यक्षमपि दृश्यते ।
यथा वानर-सङ्गीतं, यथा तरति सा शिला ॥ ३२३

इत्यादि स्वभूतानां कौतुक-चेष्टितं बहु श्रूयते, बालानां वालुका-गृह-करणमिव । तद्वदत्रापि क्षिप्रचर-रन्धनादि । देवयोनीनां कावलिकाहाराभावात् । चतुर्थ-प्रहर-यामिकः सदयवत्सः पृष्टः-तव किमाश्चर्यं बभूव । सोऽवोचद्-देव यावदहं प्रहरके स्थितोऽस्मि तावन् मृतकमुत्थाय मां प्रतिवक्ति -भो उपविष्टः किं करोषि । मया सह द्यूतेन रमस्व । ततो मयोक्तम्-मम

पाशकाद्यत्र नाऽस्ति । तेनोक्तम् मां मुञ्च यथा तत् सर्वमानयामि । मयोक्तम्-तव मुक्ति-र्ज्वालनानन्तरमेव। ततस्तेन तत्रस्थेनैव स्वबाहू विस्तार्य नगर-मध्यात् कुतश्चित् स्थानात् स्वर्ण-पट्टाद्यानीय मदग्रे मुक्तं प्रोक्तं च -रमस्वेति। मयोक्तम्-पणमोचन आवयोः शिरसी एव भवताम्। तदङ्गीकृत्य सोऽपि मृतक-वेतालो रन्तुं लग्नः । मया तत्कालमेव स द्यूते जितः। खड्गघातेन तस्य शिरो लूनं च। व्यङ्गदेहत्वात् तन्मृतकं मुक्त्वा स नष्टः । पतितं शवं भुवि। मया तदैवाऽवसरं प्राप्य ज्वलत्-तृण-पूलतो ज्वालितं गतम् । राजा चमत्कृतः पृच्छति-क्व तत् पट्टादिकं कुमारेण बहिःस्थानकादानीयतद् दर्शितं राज्ञे। नृपोऽपि तद् द्वीक्ष्योपलक्ष्य चाऽऽह-अस्मदीयमेवैतद् रमेण-योग्यं। ततो भाण्डागारिकं प्राह-त्वया किं स्वर्ण-पट्टादि स्थाने न मुक्तं। सोऽवादीत् देव मया भाण्डागार-मध्ये मुक्त्वा कपाट-तालकादि स्वहस्तेन दत्त्वा पुनस्तद्रक्षकाणां शिक्षा दत्त्वा स्वगृहेऽगामि। नृप आह-ततः स्थानादानय । ततः स तत्र गत्वा पश्यति तदा तत्र तत्र किमपि। ततः सभा-जनो वदति-देव तेन वेतालेन स्वबाहू विस्तार्य दैवत-शक्त्या कपाटे दत्तेऽपि गृहीतमेतत्। इत्यादयश्चमत्कृता वदन्ति। एतेषां चतुर्णां रात्रि-चतुर्याम-भवं चरित्रं सर्व-जन-कौतुक-कारि। महा-सत्त्वशालिन एते । यद्वा पृथिवी-पीठे नास्तिर्नाऽस्ति कस्यापि वस्तु नः। यतः -

दाने तपसि शौर्ये च, विज्ञाने विनये नये ।<br>
विस्मयो नहि कर्तव्यो, बहुरत्ना वसुन्धरा ॥ ३२४

तथैवं सत्यपि-

सूरा जयम्मि विरला, उदारचित्ता तओ य विरलयरा ।<br>
अबला-भीरूआणं, सरणपया ते वि विरलयमा ॥ ३२५<br>
विरला जाणंति गुणा ॥ (इत्यादि)

पुना राजा जजल्प-अस्मद्गृह एव वेताल-राक्षसा अलगन्। नाऽन्यत्र स्थानमभूत्। इतश्च तदैवाऽवसर एकः पुरुषो रूपवान् नारी-द्वय-युतो द्वारपाल-निवेदितो राजादे शादन्तः सभं प्रविवेश। आसनादिना मानितोऽयं राज-प्रणाम-पूर्वभुपविष्टः। राज्ञोक्तम्-विज्ञपयतु स्वकार्यम्। एकया प्रोक्तम्-देव अयं मम भर्ताऽनयाऽपरया मम रूपं विधाय भोलावितः । एष त्वन्तरं न लभते । द्वितीयया भणितम् देव एषाऽलीका अहं सत्यभार्या । निर्णयो विधीयताम्। किमपि न जानाति । सदयकुमारेण भर्ता तयोर्दूरे कृतः । प्रोक्तम् च-अनयोर्याऽत्रस्थैवामुं स्पृशति तस्या भर्ता। सत्या सा सचिन्ताऽभूतअलीकया व्यन्तर्या स्पृष्टः। देव-शक्त्या सा निष्कासिता। सभा चमत्कृता-अहो कुमारबुद्धिः ।

दाणेसराण साहसिआणं दक्खाण रूववंताणं ।<br>
तस्स कुमरस्स रेहा, पउरेहिं दिज्जए पढमा ॥ ३२६

ततो नृपेण विवादकारी श्रेष्ठयुक्तः-हे श्रेष्ठिवर न ह्येते दाम्भिका एवंविद्याः सत्याभिज्ञानादिदर्शनात् । अत एभिः कृतं तत् स्यमेव मन्यामहे । अतो यल्लभ्यं मार्गयन्त्येते तदद्यैव दीयताम । श्रेष्ठी प्रोचे-देव सत्यमेव- । परं निर्धन-सुतावत्-कथं कर्षित्वाऽर्पयामि। किञ्चित्-स्वहर्षपूरणाय विस्तर-कृते त्वदनुज्ञयाऽस्य पार्श्वादद्यतनं दिनं मार्गयामि । इत्याद्युदित्वा कायपटी-मत्या स्वपितुरनागमन-स्वरूप-ज्ञानाय तद्दिनं तत्पार्श्वाद्राज्ञा मार्गयित्वा दापितं ।

यतः -

नरेषु नापितो धूर्तः, श्वेतभिक्षुस्तपरि-वषु ।<br>
चतुष्पदेषु गोमायुर्वणिग् वाणिज्य-कारिषु ।। ३२७

अथ श्रेष्ठी द्वितीय-दिने गृह-मध्ये गत्वा विलोकयति-अद्य पूर्ववत् त्पिताऽऽगत्य सुप्तो न वा। परं नाऽऽ गतस्तदा हृष्ट-चित्तः श्रेष्ठी सदयवत्सं स्तौति-भोः पुरुषोत्तम अन्यैरसाध्यं कार्यं त्वमधुना कृतवान् अतस्त्वं धौरेय-धवल इवास्माकं मनसि प्रतिभासि ।

मार्गे कर्दम-दुस्तरे जल-भृते गर्ता शतैरा कुले,<br>
खिन्ने शाकटिके भरेऽतिविषमे दूरं गते रोधसि ।

शब्दन्नेतदहं ब्रवीमि महता कृत्वा स्थितान्तर्जनीम्<br>
इद्दक्षे विषमे विहाय धवलं वोढुं भरं कः क्षमः ।। ३२८

ततः श्रेष्ठिसुतां स्व-मित्र-वणिजे विप्र-सुतां स्व-मित्र-विप्राय राज-सुतां स्व-मित्र-क्षत्रियाया-दापयत् सदयः । एवं मित्र-त्रयं विवाह्य मण्डयामास । कथं महात्मान औचित्याद् भ्रश्यन्ति । तथा सत्पुरुषवाचा कल्पतरुरिव फलदा कस्य न स्यात् । महान् स्थान भ्रष्टोऽपि परेषां पोषको भवति। यतः -

बन्ध-स्थानेऽपि मातङ्गः, परेषां भरण-क्षमः ।<br>
काकः स्वच्छन्द-चारोऽपि, स्वोदरेणाऽपि दुःस्थितः ।। ३२९

तथा -

महतामाश्रयः पुंसां, पूजा मान्यत्व-वृद्धये ।<br>
xx xx xx हरि-पाणि-स्थितः ।।२।। ३३०

अथवा -

येनोन्मनेन गुखे न च बान्धवाय, दानं दयां न कुरुते न च भृत्यवर्गे ।<br>
किं तस्य जीवित-फलं हि मनुष्यलोके, काकोऽपि जीवति चिरं च बलिं च भुङ्क्ते ।।३३१

अतस्तेऽपि स्व-मनोरथ-पूर्ति-विशेष-पूजा-प्राप्ति-हृष्टः सस्नेहं विशिष्ट-गुण-शेवधिं

तं कुमारं सेवन्ति ।

यतः -

को न याति वंश लोकें, कवलैर्मुखपूरितः ।
मृदङ्गो मुख-लेपेन, करोति मधुरध्वनिम् ॥ ३३२

नोपकारं विंना प्रीतिः, कथञ्चित् कस्यचिद्भवेत् ।
उपयाचित-दानेन, यतो देवा अपीष्टदाः ॥३३३

तावत् प्रीतिर्भवेल्लोके, यावद्दानं प्रदीयते ।
वत्सः क्षीर-क्षयं दृष्ट्वा, परित्यजति मातरम् ॥ ३३४

पुत्रादपि प्रियं दान, महो मन्ये पशोरपि ।
महिषी तत् स्मरत्येव, खल-दानान्निजं सुतम् ॥ ३३५

ततो राजादिभिर्दत्तैः प्रभूत-धनैः सदयश्चतुरङ्ग-चमूं योजयामास ।

*यतः -*

धर्मे विवाहे विपदि द्विषः क्षये, प्रियासु नारीष्वदनेषु बन्धुरे ।
यशस्करे कर्मणि शस्त्र-संग्रहे धन-व्ययोऽष्टासु न गण्यते बुधैः ॥३३६

ततो यत्पूर्वं शून्यं नगरं दृष्टं समस्ति तस्य वासं चिकी-स्तत्रोपरि प्रतस्थै । गतस्तत्र हरसिद्धि-हेत्वनुभावात् तत्पुरो-द्वास-करं राक्षसं पूजोपचारैः सानुकूलं चकार । ततस्तदनुमत्या तत् पुरं वासयति । तस्य राज्यं दत्तं रक्षसा । लोका आनीताः ।

न श्रीं कुलक्रमायाता, शासने लिखिताऽपि न ।
खड्गेनाक्रम्य भुञ्जीत, वीर-भोग्या वसुन्धरा ॥ ३३७

आराम-वाटिकोद्यान-वापी कूप-सरोवरैर्मनोहरं कृतम् यत्र च-

समृद्धो ददाति दानं सदा-नन्दन, पाठयति न्यायमार्गं सदा नन्दनं
प्राप्नोति । न्यायैर्नवं धनं, परमाप्नोति कदापि न बन्धनं ॥ ३३८

तस्य पुरस्य मध्य-प्रवर-प्रदेशे ऽनवरत-सुरासुर-नर-वक्र-चूडा-मणि-कृत-नख-चरण-दीधितेः श्रीवीर-जिन-वरेन्द्रस्याऽप्रतिमप्रतिमा-सनाथमभ्रंलिट-शिखरं प्रासाद्मकारयद्भूपतिः । वीरकोटपुरमिति नामास्थापयत् । ततः पूजा-बलि-विधान-पूर्वं नन्द-राज्ञो लक्ष्मी प्राक-प्रत्यक्षीभूतां गृहीत्वाऽक्षय-कोशोऽभूत । स न्याय-प्रधानं तू र्वीमनुशास्ति । राज्यं तु न्यायेनैवाऽलङ्क्रियते ।

यथा -

श्रुतेन बुद्धिर्विनयेन दक्षता, प्रियेण नारी सलिलेन निम्नगा ।
निशा शशाङ्केन धृतिः समाधिनाः नयेन चालङ्क्रियते नरेन्द्रता ॥ ३३९

अथ कियता कालेन चतुर्थी-संस्थापित-श्रीपर्युषणा-पर्व-राजान् श्रीकालिकाचार्य-गुरुन् प्रतिष्ठान-पुरादाकार्य महता विस्तरेण प्रासाद-बिम्ब-प्रतिष्ठा-विधिमचीकरत् । पितृगृहेभ्यः सावलिङ्गी-लीलावती-प्रभृतीर्निर्विलम्बमानययामास । ताभ्यां शुद्धान्तः-साराभ्यां पत्नीभ्यां सहितः सुरेन्द्र इव राज्यं पालयति । ततो मित्र-त्रये राज्य-संविभागं चक्रे, वणिजे मन्त्रि-पदं विप्राय पुरोहित-पदं क्षत्रियाय सेनानी-पदं ददे क्षोणिपतिः ।

यतः -

यः साधुं सुहृदं कृत्वा, कौटिल्येन प्रवर्तते ।
स पराभूतिमाप्नोति, वञ्चितेन कथंचन ॥ ३४०

कियता कालेन सावलिङ्गी-राज्ञ्या वीरभानु-नामा पुत्रोऽभूत् । लीलावत्यास्तु वनवीर-नामा कुमारो जातः । द्वावपि सुतौ द्वासप्तति-कलासु षट्त्रिंशद्-दण्डायुध-श्रमे, कुशलौ बभूवतुः । रूपश्रियाऽश्वनीकुमारोपमौ परस्परं परम-प्रीति-जुषौ क्रीडतः ।

इतश्चाऽन्यदा कोऽपि वैदेशिको भट्टोऽपूर्वः सदयवत्स नृपस्याऽग्रे समागत्यास्यैव राज्ञोऽपूर्वार्थोत्पत्ति-बद्धां कीर्ति-काव्यमालां पठति स्म । ततः सालवाहन-नृपस्य-

उत्तरओ हिमवंतो, दक्खिणओ सालवाहणो राया ।
सम-भार-भरक्कंता, तेण न पल्हत्थए पुहवी ॥ ३४१

इत्यादिकीर्ति-परम्परां प्रभुवत्सराजस्य च यशःस्फूर्ति-प्रता पादि-बिरुदावलीं पठित्वा स्थितः । सदयवत्स-राज्ञा तुरङ्गादिदानं दत्तं । दत्त्वा पृष्टे भट्टः-कुत आगाद्-भवान् । भट्टोऽवोच-देव-अहमुज्जयिनी-पुरत आगाम् । ततः स्व-नगरी-नाम-श्रवणादानन्दवान् भूतः ।

यतः -

स्वदेश-पुर-बन्धूनां, नाम-श्रवणतो नरः ।
उल्लासी जायते शीघ्रं , किं पुनस्तज्जनागमे ॥ ३४२

राजा तत्कुशलोदन्तमपृच्छत् । सोऽवादीत्-देव किं तस्याः पुर्याः कृतः कुशलं पृच्छसि । अधुना तत्रातीव विरूपं समस्ति । राजा सम्भ्रान्त-चित्तः पृच्छति-किं विरूपं वर्तते । भट्ट आह-देव तत्र पूर्वं यत्किमप्यभूत् तदहं सम्यङ्क वेद्मि यतोऽहं तत्रोज्जयिन्यां लक्षणावतीपुर्या नवीन आगाम् । नस्थितो मासषट्कम् । परं तन्नगरी-लोकमुखादित्यश्रोषं यदत्र प्रभुवत्स-राज-

सुतेन गजो हतस्ततो द्विष्ट-मन्त्रि-प्रेरितेन राज्ञा स्वपुत्रोऽपमानितः । स ततो निर्गत्य गतः । तस्मिन् सुते विदेशं गते गजे च मृते राज्यं निःसारं बभूव ।

यतः -

न दीर्घ-दर्शिनो यस्य, मन्त्रिणः स्युर्महीपतेः ।
क्रमायाताहितास्तस्य, न चिरात् स्यात् परिक्षयः ॥ ३४३

मन्त्रिरूपा हि रिपवः, संभाव्यास्ते मनीषिभिः ।
ये सन्तं नयमुत्सृज्य, सेवन्ते प्रतिलोमतः ॥ ३४४

तत् दृशं बलहीनत्वं राज्यस्य ज्ञात्वा गृहीतुकामैः सीमाल-भूपैर्मिलित्वा पुरी-रोधः कृतोऽस्ति । न कोऽपि निर्गमनं कर्तुं शक्नोति । राजा प्रभुवत्सश्चिन्ता-प्रपन्नः किङ्कर्तव्यतामूढः पुरीमध्ये स्थितो दिनान्यतिवाहयति ।

यतः -

भय-संत्रस्त-मनसां, हस्त-पादादिकाः क्रियाः ।
प्रवर्तन्ते न वाणी च , वेपथुश्चाऽधिको भवेत् ॥ ३४५

वैरि-नृपाः परितो नगरीं पतिताः सन्ति । बहिरन्तः स्थाश्च । ते कोश-क्षयं कुर्वन्ति ।

यतः -

कोश-व्ययेन निद्रा न, न विलासेषु च स्पृहा ।
विग्रहासक्त-चित्तानां, न रतिः क्वापि जायते ॥ ३४६

आयान्ति यान्ति च परे ऋतवः परत्र, तस्मिन् पुरे तु ऋतु-युग्ममगत्वरे खे ।
वीरेण तेन सदयेन विना जनानां, वर्षा विलोचनयुगे हृदये निदाघः ॥

इत्थं-व्यतिकरेऽहं रात्रौ खाल-मार्गेण निर्गत्यात्रागां गत-दिने । ततो राजा तत् तादृशं पितृ-स्वरूपं श्रुत्वा हृदयेन वज्राहत इव पीडितश्चिन्तयति- अहो कीदृशं तस्य दुर्मन्त्रिणो दौरात्म्यं, यतस्तस्य [प्र] पञ्चकेन मम निर्वासनं पितुरीदृगावस्थानं नं बभूव ।

तथा -

मृति सुतस्य भार्याया, मान-भङ्ग धन-क्षयम् ।
मित्रं व्यसन-सन्तप्तं, देश-भङ्गं कुल-क्षयम् ॥ ३४७

परहस्तं गतं राज्यं, स्व-स्थानं पर-पीडितम् ।
धन्यास्ते ये न पश्यन्ति, बाल्ये मातृ-वियोजनम् ॥ ३४८

तदहं शीघ्रं गत्वा वैरि-जय-करणात्पितुः सौस्थ्यं संपादयामि। ततो बहु-वमू-मेलनं विधाय चलनोपक्रमं कुर्वन्नस्ति। तावत् तस्य पुत्रौ वीरभानु-वनवीर-कुमारावाग त्य विज्ञपयतः -तात वयं तत्र गत्वा पितामहं मोचयिष्यामः। त्वं तिष्ठ। राजाऽऽह-वत्सा यूयं लघीयांसो रण-कर्मण्यकुशला। अतो भवतां कथं प्रेषणं करोमि। तावाग्रहेण पितरं पर्यवसाप्य चलितौ, खलीन X X X विगलित-बहु-लाला-श्वेत-फेनिल-जल-पूरं वितन्वता जात्य-तुरङ्गम-सैन्येन परिवृतौ। तदनन्तरं कतिपयैर्दिनै राज्ञा चिन्तितं - एतौ बालौ मया प्रेषितौ परं वैरि-दलानि बहूनि सन्ति तेन माऽनयोः सङ्ग्रामे पराजय भवनेनानऽर्थो भूयात। बहु-दिन-युद्ध-करणेऽपि कुलक्षयोऽपि माऽस्तु। इत्यादिचिन्तया व्याकुल-चित्तोऽसौ चिन्तयति-

X X X X कृत्ये समुत्पन्ने, विलम्बयति यो नरः।
तत्कृत्ये देवता तस्य, कोपाद् विघ्नं प्रयच्छति॥ ३४९

यस्य यस्य हि कार्यस्य X X X X विशेषतः।
क्षिप्रमक्रियमाणस्य, कालः पिबति तद्रसम्॥ ३५०

ततो राजा तयोरनु शीघ्रं चचाल पुत्रस्नेहानुबद्धः। यतः -

न स स्यात् त्पितृषु स्नेहो, न देवे नाऽपि X X X।
X X X X, यादक् पुत्रेष्वनुत्तमः॥ ३५१

तावता कुमारावग्रतो गतौ जन-प्रेषणेन विलङ्घितौ। तत सदयवत्सनृपोऽपि मिलितः। तयोः कटकं पितृ-कटकं चैकत्राद भूत् तावद् विद्वेषिभिश्चिन्तितम्-कोऽपि महानस्य राज्ञः साहाय्य करणायाऽऽगत इति। ततस्ते संभूय संग्रामायाढौकयन्। बहवो रण-भुवि पातिताः। क्षणाद् वैरि-बलं भग्नं काकनाशं ननाश च। ततो नगरी-मध्य-स्थितस्य राज्ञः केनापि भट्टेन कथितं वर्धापनिका-मार्गण-पूर्वम्-देव तव पुत्रः सदयवत्सः समागात् सप्रौढ-दल। तस्मिंश्च युध्यमाने वैरिणो नेशुरिति। तद्वचनाकर्णनादेव प्रभुवत्स-नृपः परमानन्दमयोऽजनि। ततो राजा शीघ्रं पुत्र-मिलनायोत्सुको मन्त्र्यादीन प्रवेश-महोत्सवायादिदेश। स्वयं निर्गत एव तन्मिलनोत्सुकचित्तः। बन्धूत्कण्ठवतां क्षण-मात्र-विलम्बो वर्षायति। अन्योन्य-मिलन-हृष्ट-हृदयौ तुरङ्गमादुत्तीर्य सत्वरोपसृत्याऽऽश्लिषतां तौ।

यतः -

किं चन्दनैः सकर्पूरैस्तुहिनैः शीतलैश्च किम्।
सर्वे ते पुत्र-गात्रस्य, कलां नार्हन्ति षोडशीम्॥ ३५२

अमृतस्य प्रवाहैः किं काय-क्षालन-सङ्गतैः।
चिरात् पुत्र-परिष्वङ्गो योऽसौ मूल्य-विवर्जितः॥ ३५३

ततो धृत-माङ्गल्य-वेषाः पुष्पमाला क्षत-पूर्ण-स्वर्णपात्र-पाणयः पौराः पौरपुरन्ध्र्यश्च कुमार-विलोकनोत्सुकाः सम्मुख-मा जग्मुं। राजा पञ्च-शब्द-वाद्य-निनादोत्कीर्ण-कृत-दिग्गजं प्रवेश-महमकार्षीत्। कुमारश्चामर-ग्राहिणी-वारवधू-धूयमान-चामराली-पवनापतित-श्रम-स्वेद-बिन्दुः पुरं प्राविशत। सदयो मातुः पादौ नमश्चक्रे। सापि पुत्र-वियोग-दुःख-ताप-संतप्ता पीयूष-स्नातेवाति शीतल-हृदयाऽजनि।

यतः -

पुत्र-जन-विप्रयोगो, वह्नेरपि दुःसहो न सह्यः स्यात्।
यद्दर्शनमात्रेण हि, हृदो निदाघः प्रशाम्यति च॥ ३५४

